भारत सरकार
GOVERNMENT OF INDIA
राष्ट्रीय पुस्तकालय, कलकत्ता
NATIONAL LIBRARY, CALCUTTA

वर्ग संख्या 180JC
Class No.
पुस्तक संख्या 91·310
Book No.

रा०पु०/N.L. 38.

MGIPC—S6—13 LNL/72—10-1-73—10,000.

रा० पु०-44
N. L.-44

भारत सरकार
GOVERNMENT OF INDIA
राष्ट्रीय पुस्तकालय
NATIONAL LIBRARY
कलकत्ता
CALCUTTA

अंतिम अंकित दिनांक वाले दिन यह पुस्तक पुस्तकालय से ली गई थी । दो सप्ताह से अधिक समय तक पुस्तक रखने पर प्रतिदिन 6 पैसे की दर से विलम्ब शुल्क लिया जायगा ।

This book was taken from the Library on the date last stamped. A late fee of 6 P. will be charged for each day the book is kept beyond two weeks.

GMGIP (Pub. Unit),Sant.—S7—4LNL/80—20-8-80—250,000.

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 229.

पूर्वमीमांसा-

अधिकरणकौमुदी ।

श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्य-

विरचिता

नेने-इत्युपाह्वगोपालशास्त्रिणा परिशिष्टाधिकरणानि-

रूपणपूर्वकं टिप्पण्या परिष्कृत्य संशोधिता ।

सा च-

बाबू हरिदासात्मजेन जयकृष्णदासगुप्तेन

स्वीये विद्याविलासनाम्नि यन्त्रालये

संमुद्र्य प्रकाशिता ।

PURVAMÎMÂMSÂ

ADHÎKARANAKOUMUDI

By Mahàmahopàdhyàya Pandit Ramkrishna Bhttachàrya.

Edited by Pandit Gopal Sastri Nene.

FASCICULUS 1-१

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHMBA SANSKRIT SERIES OFFICE. BENARES.

AGENTS:-

OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY:

PROBSTHAIN & CO; BOOKSELLERS, LONDON.

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press.

BENARES.

Price Rupee one.

MAR 17 2020

॥ श्रीः ॥

—:o:—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तवकः—२२९.

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तवको मुद्रयित्वा प्रकाश्यते । एकस्मिन् स्तवके एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरणधर्मशास्त्रसाहित्यपुराणादिग्रन्था एवाऽत्र सुपरिष्कृत्य मुद्र्यन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

४ भारतवर्षीयैः, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्चैतद्ग्राहकैर्ग्रंथे वार्षिकमपि मूल्यम्—मुद्राः ७ आनकाः ८

५ अन्यैर्ग्रंथे प्रतिस्तवकं ... ... " " १ " ०

६ प्रापणव्ययः पृथग् नास्ति । ... ...

सम्प्रतं मुद्र्यमाणा ग्रन्थाः—

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता खण्डं २

(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः १०

(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृतन्यायरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् । १०

(४) भाष्योपबृंहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्यप्रणीतम् श्रीनारायणतीर्थविरचितभाष्टभाषाप्रकाशसहितं सम्पूर्णम् (वेदान्तः) २

(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः १

(६) भाट्टचिन्तामणिः । महामहोपाध्यायश्रीगागाभट्टविरचिता । तर्कपादः (मीमांसा) २

(७) न्यायरत्नमाला श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णः (मीमांसा) २

(८) ब्रह्मसूत्रभाष्यम्-बादरायणप्रणीतवेदान्तसूत्रस्य यतीन्द्रश्रीमद्विज्ञानभिक्षुकृतव्याख्यानम् । सम्पूर्ण । (वेदान्तः) ६

(९) स्याद्वादमञ्जरीमल्लिषेणनिर्मिता सम्पूर्णा २

(१०) सिद्धित्रयम्—विशिष्टाद्वैतब्रह्मनिरूपणपरम् श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्णं (वेदान्तः) १

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः । आचार्यचिन्सुखमुनिविरचितव्याख्योपेतः (वेदान्तः) ४

(१२) विभक्त्यर्थनिर्णयो न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायविरचितः सम्पूर्णः (न्यायः) ५

(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सम्पूर्णम् (मीमांसा) २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) ११

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 229.

पूर्वमीमांसा-

अधिकरणकौमुदी ।

श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्य-

विरचिता

नेने-इत्युपाह्वगोपालशास्त्रिणा परिशिष्टाधिकरणनि-

रूपणपूर्वकं टिप्पण्या परिष्कृत्य संशोधिता ।

सा च-

बाबू हरिदासात्मजेन जयकृष्णदासगुप्तेन

स्वीये विद्याविलासनाम्नि यन्त्रालये

संमुद्र्य प्रकाशिता ।

PURVAMÎMÂMSÂ

ADHÎKARANAKOUMUDI

By Mahàmahopàdhyàya Pandit Ramkrishna Bhttachàrya.

Edited by Pandit Gopal Sastri Nene.

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT SERIES OFFICE. BENARES.

AGENTS:-

OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY:

PROBSTHAIN & CO; BOOKSELLERS, LONDON.

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press,

BENARES.

1916.

Registered According to Act XXV of 1867.

भूमिका ।

—:o:—

ईश्वरकृपया समापत् किल मुद्रणमेतस्य मीमांसाद्वादशलक्षणीसहस्राधिकरणगतधर्मशास्त्रानुपयुक्ताधिकरणानां संग्राहकस्याधिकरणकौमुद्याख्यस्य ग्रन्थस्य ।

अयं खलु निबन्धो धर्मशास्त्रोपयोगिमीमांसाशास्त्रजिज्ञासूनां तदर्थमधिकरणमालाशास्त्रदीपिकादिबहुग्रन्थान् सप्रयत्नं पठतामपि तेषामतिविस्तृततयाऽभ्यासासौकर्यं पर्यालोच्य तेषामुपकारकरणे कृतमतिभिर्विरचितो महामहोपाध्याय पं० श्रीमद्विद्वद्वररामकृष्णभट्टाचार्यमहाशयैः ।

मीमांसादर्शनाभिलाषिणां धर्मशास्त्रिणां झटित्यर्थबोधकं कञ्चिद्ग्रन्थं बहुदिनेभ्यो गवेषयद्भिः काशीस्थराजकीयप्रधानपाठशालातो लब्धव्याकरणाचार्यपदवीकैः श्री १०६ युत पं० नित्यानन्दपन्तैर्गुरुचरणैः प्रेरितेन विविधसंस्कृतपुस्तकसम्पादनरसिकेन श्रीगोविन्ददासमहाशयेन मिथिलातो महता ऽऽयासेन महामहोपाध्याय पं० श्रीगङ्गानाथ झां डाक्टरमहाशयद्वारा ऽऽनायितमेकं खण्डितमपरं जगन्नाथपुरीस्थगोवर्द्धनमठालब्धमशुद्धप्रायं च पुस्तकं वितरता प्रवर्तितो गुरुजनाज्ञया च मुद्रणे कृतमतिरन्यशुद्धपुस्तकसम्पादने कृतबहुलायासोऽपि हताभिलाषः त्रुटिताक्षरस्थलेषु विषमपदस्थलेषु च समपादयं शाबरभाष्यादिपर्यालोचनया टिप्पणीम् ।

अथास्य मुद्रणे प्रवृत्ते प्रमाणतयोपन्यस्तानि सूत्राणि महर्षिजैमिनिकात्यायनादिसूत्रेष्वपश्यन् तत्रतत्राध्यायाङ्कमददानः 'तानि तात्पर्यार्थकानि' इति सूचयन् क्वचिच्च पाठभेदं दर्शयन् एतत्पर्यालोचिनामवगमसौकर्याय सूत्राणि स्थूलाक्षरैरस्थापयम् ।

धर्मशास्त्रादिषु बहुश उपयुक्तान्यत्र चानुक्तानि कतिपयान्यधिकरणानि तन्त्रवार्तिकादिप्राचीनग्रन्थाशयपरिग्रहेण यथामति न्यरूपयंश्च ।

तदेवं महान्तमायासमनुभूय सम्पादितेऽस्मिन् कार्ये मीमांसादर्शनबुरुहतायाः सुप्रसिद्धतया मन्मतेरपाटवेन सीसकाक्षरयोजकदोषेण च सुलभानि स्खलितानि क्षाम्यन्तो गुणैकदृशो दर्शनरसिका, आस्वादयन्तु च मीमांसाधिकरणरचनासुगमशैलीसमुत्थं प्रमोदं, प्रसीदतु च भगवाननेन व्यापारेण सर्वान्तर्यामी श्रीकाशीविश्वेश्वर इति शम् । मेने—हत्युपाख्यो

गोपालशर्मा.

अधिकरणकौमुद्याम् ।

—:○०○:—

अधिकरणसूचीपत्रम् ।

		पृ०	पं०
१	परिषदधिकरणम्	१	१४
२	रात्रिसत्राधिकरणम्	२	१८
३	विश्वजिदधिकरणम्	३	२३
४	सर्वस्वदाक्षिण्याधिकरणम्	४	२१
५	होलाकाधिकरणम्	५	११
६	फलचमसाधिकरणम्	,,	२१
७	सर्वपिष्टाधिकरणम्	६	८
८	हविरुभयत्वाधिकरणम्...	,,	१७
९	ग्रहैकत्वाधिकरणम्	७	६
१०	तदर्थशास्त्राधिकरणम्	,,	१६
११	निषादस्थपत्यधिकरणम्	८	८
१२	रथकाराधिकरणम्	,,	२०
१३	तन्त्रन्यायः–(क्षामवतीष्टिन्यायः)	९	५
१४	प्रसङ्गन्यायः	१०	७
१५	अङ्गस्य प्रधानावृत्त्यप्रयोजकत्वन्यायः	११	८
१६	योगसिद्ध्यधिकरणम्	,,	१९
१७	कर्मण्यारम्भाधिकरणम्	१२	१७
१८	शंस्यधिकरणम्	१३	७
१९	देवताधिकरणम्	,,	२४
२०	परिषदधिकरणम्	१४	४
२१	कौण्डपायिनामयनाधिकरणम्	,,	११
२२	यागदानहोमाधिकरणम्	१५	१०
२३	पदाहवनीयन्यायः	१६	१७
२४	पदिन्यायः	१७	२

		पृ०	पं०
२५	स्फ्याद्यिलष्टेज्याधिकरणम्	१७	१२
२६	कृष्णलन्यायः	१८	१३
२७	कपालाधिकरणम्	”	२१
२८	अर्थवादाधिकरणम्	१९	१४
२९	विरोधाधिकरणम्	२०	१
३०	प्रतिनिध्यधिकरणम्	,,	१५
३१	फलभूमाधिकरणम्	२२	१
३२	अनुषङ्गाधिकरणम्	,,	२३
३३	देवतासाहित्याधिकरणम्	२३	१०
	(विकल्पे अष्टदोषनिरूपणम्)	२४	८
३४	यावज्जीवाधिकरणम्	२६	१६
३५	जातेष्ट्यधिकरणम्	२७	३
३६	काम्यस्य नित्यापेक्षया विलम्बिताधिकारः ...	,,	१६
३७	तदन्तापकर्षन्यायः	२८	१८
३८	तदाद्युत्कर्षन्यायः	२९	७
३९	संयोगपृथक्त्वन्यायः	३०	१
४०	व्यक्तिवचनन्यायः	३१	४
४१	पणपुराणन्यायः	,,	२०
४२	दण्डापूपन्यायः	,,	२४
४३	द्यूतपणन्यायः	३२	३
४४	कपिञ्जलाधिकरणम्	,,	९
४५	तक्षसूत्राधिकरणम्	,,	२१
४६	आरम्भणीयन्यायः	३३	८
४७	अङ्गस्य प्रधानकालान्वयानन्वयौ	,,	१७
४८	समं स्यादश्रुतित्वादितिन्यायः	३४	५
४९	अनेकार्थत्वाकल्पना	,,	१०
५०	प्रक्रमाधिकरणम्	,,	१८
५१	पृथग्विधौ गुणविधानासम्भवः	३५	८
५२	सर्वशक्त्यधिकरणम्	,,	१६
५३	तिर्यगधिकरणम्	३६	६

		पृ०	पं०
५४	एषाधिकरणम्	३७	१३
५५	सहसाहित्यविवेकः	,,	२०
५६	अलेवालीन्यायः	३८	१६
५७	प्रतिपत्त्यधिकरणम्	३९	१
५८	आष्टमिकविकृत्यधिकरणम्	,,	११
५९	धान्यमस्त्यधिकरणम्	,,	२१
६०	ऊहाधिकरणम्	४०	७
६१	पाशाधिकरणम्	४१	८
६२	कालशौचाधिकरणम्	,,	२०
६३	हेतुमन्निगदाधिकरणम्	४२	५
६४	आरुणीन्यायः	,,	१२
६५	सोमयाजिन्यायः	,,	१८
६६	अक्ताधिकरणम्	४३	१७
६७	आमिक्षाधिकरणम्	४४	१
६८	अभ्युदितेष्टिन्यायः	,,	१३
६९	हविरुपलक्षणाधिकरणम्	४५	३
७०	प्राणाधिकरणम्	,,	२३
७१	विविदिषदधिकरणम्	४६	११
७२	स्मृत्यधिकरणम्	,,	२३
७३	ज्योतिरधिकरणम्	४७	१३
७४	वैश्वानराधिकरणम्	,,	२२
७५	गुणविकृत्यधिकरणम्	४८	१७
७६	क्रम	४९	२
७७	श्रुतिलिङ्गादिन्यायः	५०	१७
	(श्रुतिप्राबल्यम्)	५२	८
	(वाक्यालिङ्गस्य बलवत्त्वम्)	,,	२१
	(प्रकरणाद्वाक्यस्य ")	५३	१२
	(स्थानात्प्रकरणस्य ")	५४	७
	(समाख्यातः स्थानस्य ")	,,	१९
७८	विधिनियमादिः	५५	१८

		पृ०	पं०
७९	श्रुतशब्दात्यागः	५९	१
८०	विध्यनुवादवैषम्यम्	,,	१३
८१	नित्यानित्यवैषम्यम्	६०	२
८२	सापेक्षत्वनिरपेक्षत्ववैषम्यम्	,,	११
८३	द्वयोः प्रणयन्तीत्यधिकरणम्	६१	३
८४	परिभाषाधिकरणम्	६३	१६
८५	सर्वनामाधिकरणम्	६४	१४
८६	निषेधपर्युदासौ	६५	४
८७	यज्ञकर्न्यायः	६९	२१
८८	अनुयाजाधिकरणम्	७०	१०
८९	सक्त्वधिकरणम्	,,	२३
९०	गिरगिराधिकरणम्	७२	१३
९१	कलञ्जाधिकरणम्	७३	५
९२	लिङ्गसमवायन्यायः	७४	१
९३	प्रकृतिभागव्यवस्था	,,	१४
	(प्रकृतिविकृतिलक्षणे)	७८	१३
९४	स्थालीपुलाकन्यायः	८०	१०
९५	वाजपेयाधिकरणम्	८३	१३
९६	अरुणाधिकरणम्	८६	१
९७	वैश्वानरेष्ट्यधिकरणम् (जातेष्टिन्यायः) ...	८९	१२
९८	असज्जातविरोधिन्यायः	९३	७



शुद्धिपत्रम् ।

अशुद्ध.	शुद्ध.	पृ०	पं०
करियते	करिष्यते	२	२४
इष्टत्वन्तु	इष्टन्तु	४	२
समृण्मये	स मृन्मये	५	२२
मृण्मय	मृन्मय	,,	२३
काष्ठपा	काष्ठे पा	६	११
नन्यरं	नन्तरं	११	९
विहितत्वात्	विहितत्वात्	,,	१०
निर्वाहः	निर्वाहः	,,	१३
बाधका	बोधका	१४	९
यदाह	पदाह	१६	१७
रूप	सूर्य	२३	५
मनोहा	मनोता	२४	५
तच्चाधि	तस्य चाधि	२७	५
चेनत्वेन	चेतनत्वेन	३४	२४
बोधना	बोधना	३७	१८
अर्थैकत्वे (इत्यादि) ३—१—६—१२	समुच्चयो वा (इत्यादि) १२—४—३—६	४२	२४
दवः	दरः	४४	११
नाशकन	नाशकेन	४६	१३
तेन	तन्न	५४	४
बाधका	बोधका	७३	११
बाधकम्	बोधकम्	,,	१३
प्रायश्चित	प्रायश्चित्त	७५	१८
वैष्णव्याविति	वैष्णव्यावृति	८१	८
अर्थैकत्वं	अर्थैकत्वे	८७	२१

॥ अधिकरणकौमुदी ॥

श्रीहनुमते नमः ॥ श्रीगुरुभ्यो नमः ।
श्रीगणेशाय नमः ॥

नन्दसूनुं नमस्कृत्य सर्वलोकेश्वरेश्वरम् ॥
निरूप्यते ऽधिकरणं रामकृष्णेन विश्रुतम् ॥ १ ॥

अधिकृत्य क्रियते ऽर्थविचारो यस्मिंस्तदधिकरणं मीमांसासिद्धान्तः । तस्याङ्गानि पञ्च । यथाऽऽह भट्टः—

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
निर्णयश्चेति पञ्चाङ्गं शास्त्रे ऽधिकरणं स्मृतम् ॥

विषयो यमधिकृत्य विचारः । विशयो विप्रतिपत्त्या संशयः । पूर्वस्य वादिनः पक्षो मतं पूर्वपक्षः । वादिनिरासकं वाक्यमुत्तरम् । निरासश्चामदुत्तरेणाप्यप्रतिभस्य वादिनः सम्भवतीत्यत आह—निर्णयश्चेति । प्रमारूप इत्यर्थः ।

१ अथ परिषदधिकरणम्—

यथा "सप्तदशावरा ऋद्धिकामा द्वादशाब्दं सत्रमुपासीरन्, य एव यजमानास्त एव ऋत्विजः" इति श्रूयते । सप्तदश अवरे निकृष्टा येषां ते सप्तदशावरा ऋत्विजः, तेन सप्तदशन्यूनकर्तृकं सत्रं न सम्भवति । य एव यजमाना इति । तथाच सर्वैरेव होतव्यमिति पूर्वपक्षे जैमिनिसूत्रम्—(१)"सत्रे वर्य्यो होता

(१) अस्मिन् ग्रन्थे प्रमाणतयोपन्यस्तानि सूत्राणीदानीमुपलब्धेषु महर्षिजैमिनिप्रणीतषोडशाध्यायीसूत्रपाठ-तत्सहितशाबरभाष्याधिकरणमालासूत्रवृत्त्यादिपुस्तकेषु नोपलभ्यन्ते । अतः कुत्र-

अन्येषामर्पणम्" इति । अस्यार्थः—सत्रे स्वीयस्वीयद्रव्याणि मिश्रणेन साधारणानि कृत्वा वर्यं मुख्यं होतारं कृत्वा ऽन्ये ब्रह्मत्वमदस्यत्वादीनि ऋत्विक्कर्माणि कुर्युः । साधारणद्रव्येषु सर्वेषां स्वत्वेन देवोद्देश्यकत्यागात् (१)यजमानत्वमिति । किन्त्वत्राऽऽनतिकरी दक्षिणा नास्ति । सर्वेषां यजमानत्वात् । स्वोद्देश्यक(२)त्यागासम्भवात् । तिर्यगधिकरणविरोधात् अ०६पा०१ अधि०२। आनतिः प्रीतिः । तथाच स्वत एव स्वस्मिन्प्रीतिरस्ति । नचैकेनान्यस्मै दक्षिणा दीयतामिति वाच्यम् । सत्रस्यैककर्मत्वेनैक एव दक्षिणोत्सर्गः, ज्योतिष्टोमे षोडशर्त्विज उद्दिश्य गोशतदक्षिणोत्सर्गवत् । अत्र सर्वेषामृत्विक्त्वेन स्वोद्देश्यकत्वस्यासम्भवात् । श्राद्धादौ वाचनिको दक्षिणाभेदः । नचोदासीनाय दीयतामिति वाच्यम् । तर्हि नानतिकरी दक्षिणा, तस्यानृत्विक्त्वात् । अदृष्टार्था दक्षिणा तु वाचनिकी । वचनन्त्वत्र नास्त्येवेति सत्रे दक्षिणाभाव एवेति । अत्र च फलस्य न परिपदृत्तित्वम् बहुत्वविशिष्टस्याचेतनत्वात् । किन्तु प्रत्येकवृत्तित्वमिति । तथाच फलस्य बहुत्वमेवान्यथाऽनुपपत्तेः । तदुक्तं-"सर्वतो बलवती ह्यन्यथाऽनुपपत्तिः" इति ।

२ अथ रात्रिसत्राधिकरणम्—

"प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति" इति श्रूयते । प्रतिर्वीप्सायाम् । पुनः पुनर्देहावच्छेदेन तिष्ठन्तीत्यर्थः । चिरंजीविनो भवन्तीति यावत् । एता रात्रीरिति प्रकरणात् । अधिकार्थे उप । यन्तीति इण् धातोः । तथाच अधि-

---

त्यानीति न ज्ञायते । क्वचित्तु पाठभेदेन दृश्यन्ते । स च तत्र तत्र स्पष्टीकरिष्यते ।

(१) यागजन्यफलभागित्वमित्यर्थः । (२) स्वमुद्दिश्येति वा पाठः ।

कं ध्यायन्तीत्यर्थः। यागे उद्देश्यदेवताध्यानस्य विहितत्वात्। अत्र चास्याः श्रुतेरर्थवादत्वेन प्रतिष्ठाफलं न ग्राह्यम्। किं तु विश्वजिन्न्यायेन स्वर्ग एव फलमिति पूर्वपक्षे सूत्रम्-"फलं सान्निधिकम्" अ०४पा०३सू१८ इति(१)। अस्यार्थः-यद्यत्सन्निहितं श्रुतं तदेव फलं ग्राह्यम्। तत्राऽऽदौ विधिश्रुतम्, ततः आर्थवादिकम्, तदभावे आनुषङ्गिकम्, तदभावे लिङ्गस्थमिति। अत्र यथापूर्वं सन्निहितं बोध्यम्। तथाच रात्रिसत्रे विध्यभावेनाऽऽर्थवादिकं प्रतिष्ठाख्यं फलमेव ग्राह्यम्। विश्वजित्स्थले तु फलं न श्रुतं किन्तु कल्प्यमिति तस्य दुर्बलत्वम्।

आनुषङ्गिकं यथा-"आरोग्यकामः सौरेण यजेत" इत्यनन्तरं "आश्विनौ यजेत" इति श्रूयते। तत्राप्यनुषङ्गा(२)दारोग्यं फलम्। नचानुषङ्गे तत्पदस्याऽऽवृत्तिरिति वाच्यम्। आवृत्तौ हि तादृशपदान्तरकल्पनम्, अनुषङ्गे तु तत्पदस्य परवाक्ये समभिव्याहारकल्पनमिति। अयमेवानुषङ्गिकाधिकरणन्यायः। अ० २ पा० १ अधि० १६। अन्वयबोधस्तु क्रमिकः। अतो वाक्यभेद एवेति। अत्र चैकसाधनावरुद्धे साधनान्तरस्य निराकाङ्क्षत्वेन विकल्पः कल्प्यते। सौरेण वा ऽऽश्विनेन वा आरोग्यमिति। सौरस्य बहङ्गकत्वेन तदसामर्थ्ये आश्वियाग इति व्यवस्थितो विकल्प इति।

लिङ्गस्थं फलं यथा-लिङ्गं मन्त्रः(३)। "ऐन्द्रं यजेत" इत्यत्र यागे मन्त्रः श्रूयते "इन्द्रो देवः सहस्राक्ष ऐन्द्रदस्तस्मै जुहोमि" इति। अतैन्द्रद इति श्रवणादैन्द्रपदं फलमिति।

३ अथ विश्वजिदधिकरणम्-

---

(१) "फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात्" इति पाठः।
(२) अनुषङ्गः सामीप्यम्। (३) लिङ्ग्यते ज्ञाप्यतेऽनेनेतिव्युत्पत्तेः।

"विश्वजिता यजेत" इति श्रुत्येष्टसाधनत्वं बोधितम् । इष्टत्वन्तु कल्प्यम् । उक्तचतुर्विधफलासम्भवात् । तत्र च ग्रामधनादीनां गौणपुरुषार्थत्वाद्विनिगमनाविरहाच्च न फलत्वम् । मोक्षस्य च तत्त्वज्ञानमात्रसाध्यत्वात्, तत्र ज्ञानस्य च गौणप्रयोजनत्वात्, प्रतियोगिनिरूप्यतया मोक्षस्याभावरूपस्यानुपस्थितेश्चेति, स्वर्गस्याप्यनुपस्थित्या फलत्वेन कल्पने मानाभावादित्यत्र सूत्रम्- "स स्वर्गः स्यात्सर्वान्मत्यविशिष्टत्वात्" अ० ४ पा० ३ सू० १५ इति । देशात्मकस्वर्गवारणाय स इति । दुःखासम्भिन्नादिरूप(१) इत्यर्थः । सर्वानिति । वैराग्यरहितानिति शेषः । अविशिष्ट इति-इच्छाज्ञानविषयत्वेन । तथाच ज्ञानं विना इच्छाया असम्भवात् स्वर्गस्योपस्थितिरस्त्येवेति फलं स्वर्ग एव ।

ननु विश्वजयिनो विश्वजिद्यागो नित्य एवास्तु फलाश्रवणात्, कार्तिकामावास्यायामुल्कादानलक्ष्मीपूजनवत्, इति चेन्मैवम् । विश्वजित्सर्वेजिद्बहुसुवर्णकराजसूयादिसर्वमेधान्तानां षोडशानामेव विश्वजयिकर्तव्यत्वेन बोधनात् । तथाच विश्वजितो नित्यत्वेन प्रथमकर्तव्यत्वात् तत्र च सर्वस्वदक्षिणया सर्वजिदादिषु धनाभावेनाप्रवृत्त्या तद्विधेरननुष्ठानलक्षणाप्रामाण्यं स्यात् । अतो विश्वजिद्यागो न नित्यः । सर्वजिदादीनान्तु फलश्रुत्या काम्यतैवेति ।

४ अथ सर्वस्वदाक्षिण्याधिकरणम्-

"उद्गातृपूर्वान् विश्वजिते, प्रतिप्रस्थातृपूर्वान् सर्वजि-

---

(१) यत्र दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ॥ अभिलाषोपनीतञ्च तत्सुखं स्वःपदास्पदम् । इति तन्त्रवार्तिकोक्तः स्वर्ग इति यावत् ।

दादौ, सर्वमेधे तूभयम्" इतिश्रुत्या विश्वजित्युद्गातृप्रधानाः षोडशर्त्विजः, सर्वजिदादौ प्रतिप्रस्थातृप्रधानाः षोडश, सर्वमेधे तूद्गातृप्रधानाः प्रतिप्रस्थातृप्रधानाश्च । तेनात्र गणद्वयेन द्वात्रिंशदृत्विजो भवन्ति । तथा च "उद्गातृभ्यः सर्वस्वं दाक्षिण्यं, प्रतिप्रस्थातृभ्यो न"इति श्रूयते । उद्गातृभ्य उद्गात्रादिभ्यः । तेन विश्वजिति सर्वस्वदक्षिणा, सर्वजिदादिषु यत्किञ्चित् पारितोषिकं, सर्वमेधे तु सर्वस्वं यत्किञ्चिचेति ।

न च सर्वस्वे दत्ते यत्किञ्चिदिति कथं स्यादिति वाच्यम् । सर्वस्वपदेन सर्वं तैजसमुक्तं(१) भूमिवस्त्रादिकं च न सर्वस्वाभ्यन्तरीणम् ।

५ अथ होलाकाधिकरणम्—

प्राच्यानां होलाकाऽऽचारदर्शनात्तदर्थं 'होलाका ऽऽचरणीया' इति सामान्यविधिः कल्प्यते । न च प्रतीच्यानामनाचरणात्प्राच्यैरिति विशेषणपदं देयम् । सामान्यविधिनैव प्राच्याऽऽचारोपपत्तेः । प्रतीच्यानामनाचरणस्येच्छाविरहेणैवोपपत्तेः । इच्छाविरहश्च तदेशीयपूर्वपूर्वाणामनाचारदर्शनात्, प्रतीच्यानामुल्कादानाद्याचारविरहवत् । नह्यनाचारार्थं वेदः(२) कल्प्यते । तथा च यत्र सामान्यश्रुत्या उपपत्तिस्तत्र विशेषविधिर्न कल्प्यते, 'गुरुरनुगन्तव्यः सदा' इतिवत् । नहि कर्मकाले तदसम्भवात्तदन्यकाले इति तत्र विशेषणीयमिति ।

६ अथ फलचमसाधिकरणम्—

---

(१) अत एव रघुकाव्ये "समृण्मये वीतहिरण्मयत्वात्' इति । अन्यथा मृण्मयमपि कथं तस्य । हिरण्मयं तैजसम् ।

(२) श्रुतिरिति पाठः ।

"प्रोद्गातृणां फलचषसं हुतशेषं भक्ष्यं ददाति" इति श्रूयते । प्रोद्गातृणामिति बहुवचनात् प्रोद्गात्रादिऋत्विजां सर्वेषामित्यर्थः ।

यवव्रीहितिलैर्मुद्गैः साधितश्चमसः स्मृतः ॥

फलं नारिकेलं "अनादेशे नारिकेलं फलम्" इति श्रुतेः । तथा च फलसहितश्चमस इत्यर्थः । हुतशेषमिति । तेन होमेऽपि तद्द्रव्यमिति ।

७ अथ सर्वपिष्टाधिकरणम्—

"सर्वपिष्टं मिथुनेन पेषणीयम्" इति श्रूयते । अत्र मिथुनशब्दस्य सपुत्रपाषाणे न लक्षणा । तथा च मिथुनपदेन स्त्रीपुंसावित्युक्तौ । पेषणन्तु यत्र तत्र काष्ठपाषाणादौ वा कर्तव्यमिति पूर्वपक्षे जैमिनिसूत्रम्—"निरूढत्वात्" इति । निरूढलक्षणा शक्तितुल्या, शक्तिवत्तस्या अपि झटित्युपस्थापकत्वात् । मिथुनपदस्य सपुत्रपाषाणे निरूढलक्षणा । तेन सपुत्रपाषाण एव पेषणम् । अन्यथा कुत्र पेषणीयमित्यनध्यवसायेन प्रवृत्तिर्न स्यात् । पेषणे स्त्रिया अप्यन्वये गौरवञ्च स्यादिति ।

८ अथ हविरुभयत्वाधिकरणम्—

पुत्रेष्टियागे श्रुतिः "व्रीहिभिर्यवैश्च प्राजापत्यं पृथक् श्रपयेत्, हविषी संस्कुरुते, आज्येन प्रोक्ष्यावहत्य कपिलाक्षीरेण पचेत्" इति । आज्येनेतिविशेषश्रुतेः सामान्यविधिप्राप्तस्य जलेन प्रोक्षणस्य बाधः । हविषी व्रीहियवौ । अथास्य विकृतौ पुत्रेष्टियागान्तरे श्रुतिः "यवमयश्चरुर्भवति" इति । अत्र च 'प्रकृतिवद्विकृतिः' इतिन्यायेन सर्वधर्मप्राप्तावपि न संस्कारप्राप्तिः । प्रकृतौ हविषी इतिश्रवणात् द्वित्वविशिष्टस्य संस्कारप्राप्तेः ।

अत्र च यत्रमात्रश्रवणे द्वित्वविशिष्टहविषोऽभावात् तत्प्राप्त्यभाव इत्याज्येन नात्र प्रोक्षणं, किन्तु सामान्यप्राप्तजलेनैवेत्यत्र सिद्धान्तसूत्रम्-"द्वित्वमनपेक्षितमप्रधानत्वात्" इति। शाब्दबोधे विधेयं प्रधानम्, उद्देश्यमप्रधानम्। तेनात्रोद्देश्यगतत्वाद्द्वित्वं हविर्गतं लिङ्गञ्च नपुंसकमविवक्षितमिति।

९ अथ ग्रहैकत्वाधिकरणम्—

"ग्रहं संमार्ष्टि" इति श्रूयते। गृह्यते हविरनेनेति ग्रहो यज्ञपात्रम्। स्रुक्स्रुवादयः। "ग्रहैर्जुहोति" "दश ग्रहान् गृह्णाति" इति। तथा च ग्रहमित्येकवचनेनैकपात्रस्य मार्जनप्राप्तौ कस्येत्यनध्यवसायादप्रवृत्त्यापत्तिरिति। अत्र सूत्रम्-"सर्वेषां वा लक्षणत्वादविशिष्टं हि लक्षणम्" अ० ३ पा० १ सू० १४ इति। अपस्कृतेन पात्रेण यज्ञनिषेधात्सर्वेषामेव मार्जनमपेक्षितम्। तेनात्रैकत्वमविवक्षितम्। न च हविरुभयत्वाधिकरणेनेदमन्यथासिद्धम्। तत्र द्वित्वस्यान्वयबोधे ऽप्रवेशात्। अत्र चैकत्वस्यावच्छेदकत्वेनानन्वयेऽपि सामानाधिकरण्येनान्वये प्रवेशादिति।

१० अथ तदर्थशास्त्राधिकरणम्—

बार्हस्पत्ययागे श्रूयते "प्रयाजं करोति नानुयाजम्" इति। अत्र नानुयाजमिति श्रवणान्निषेधानुपपत्त्या दर्शधर्मातिदेशः पश्चाद्धान्यः। तथा च "अनुवादः प्राप्तबोधो विधिरप्राप्तबोधकः" इति सूत्रे ऽप्राप्तेति निष्ठाप्रत्ययश्रुतेः पश्चात्प्राप्तव्येऽपि प्रयाजे न विधित्वहानिः। पूर्ववाक्यस्य "प्रयाजं करोति" इति वाक्यस्य सार्थकत्वादादौ प्रयाजाचरणं ततो ऽनुयाजं विहायातिदेशप्राप्तव्याश्चतस्र आहुतयः कर्तव्या इति नात्र षडाहुतय इति पूर्वपक्षे सिद्धान्तसूत्रम्-"तदर्थशास्त्रं निष्ठाया अनिष्ठितत्वात्"

इति । स विधिरर्थो ऽभिधेयो यस्य तत्तदर्थशास्त्रम् 'अप्राप्तप्रापको विधिः' इतिसूत्रम् । तत्र निष्ठाप्रत्ययस्यानिष्ठितत्वादविवक्षणादित्यर्थः । तेन मानान्तरेण प्राप्तृत्वविषयबोधको विधिः । अत्र च प्राप्तव्यत्वेन प्राप्तिविषयत्वात् प्रयाजं करोतीति न विधिः । किन्त्वनुयाजस्थाने एव प्रयाजान्तरविधिः । तेनातिदेशप्राप्तव्यस्य प्रयाजस्याऽऽदावाचरणम्, ततो ऽनुयाजस्थले पुनः प्रयाजान्तराचरणं, ततश्चतस्र आहुतय इति षडाहुतिसंख्या स्थितेति ।

११ अथ निषादस्थपत्यधिकरणम्—

"निषादस्थपतिं याजयेत्, स वै शक्त इति स्वयं जुहोति" इति श्रुत्या यजमानकर्तृको मन्त्रपाठः प्राप्तः । तथा च निषादस्थपतीत्यत्र कर्मधारयसमासे निषादस्य मन्त्रपाठापत्त्या विद्याप्रयुक्त्यापत्तिः । निषिद्धस्य पाठनं विद्याप्रयुक्तिः । तथा च निषादः स्थपतिर्यस्येति बहुव्रीहिः, निषादस्य स्थपतिरिति षष्ठीतत्पुरुषसमासो वा ऽऽश्रयणीयः । तेन त्रैवर्णिकस्यैवम्भूतस्य याजनमिति न विद्याप्रयुक्तिरिति । अत्र सिद्धान्तसूत्रम् —"झटित्युपस्थापकत्वात्" अ० ६ पा० १ सू० ५१ इति(१) । बहुव्रीहिषष्ठीतत्पुरुषसमासयोर्लाक्षणिकत्वेनानुपपत्त्यधीनतया विलम्बोपस्थापकत्वात् । कर्मधारयस्य तदभावेन शीघ्रोपस्थापकत्वात् तेनैवान्वयबोधः । फलमुखत्वाद्विद्याप्रयुक्तिर्न दोषायेति ॥

१२ अथ रथकाराधिकरणम्-

"वर्षासु रथकार आदधीत" इत्याधानाख्यं कर्म रथकारस्य विधीयते । अत्र योगार्थाऽऽदरे त्रैवर्णिकपरत्वं सम्भवदपि लाघवाद्रूढस्य जातिविशेषस्यैव ग्रहणम् । यथा—

(१) "शब्दसामर्थ्यात्" इति सूत्रपाठे ।

'माहिष्येण करिष्यां तु रथकारः प्रजायते' इति।

योगार्थस्य तु रूढ्यर्थतो गौरवम्। अनेकपदार्थान्वयानन्तरमुपस्थापकत्वादिति। तेन याजनं विना आधानकरणासम्भवात् रथकारस्य ब्राह्मणेन याजनसिद्धिरिति॥

१३ अथ(१) तन्त्रेन्यायः—

"असंस्कर्ता पिता बालहा भवति यथासमयम्, तदकरणे क्षामवत्या यजेत, ततश्च संस्करोति" इति श्रुतेः मुख्यकाले जातेष्ट्यादेरकरणे तज्जन्यप्रत्यवायनाशाय क्षामवतीमिष्टिं कृत्वा गौणकालेऽपि संस्कारान् जातेष्ट्यादीन् कुर्यादिति सिद्धम्। तत्र यदि बहुसंस्काराकरणं तदा बहुप्रत्यवायोत्पत्तेः प्रत्येकदोषनाशाय पृथक् क्षामवतीं कुर्यात्। एकया क्षामवत्याऽनेकप्रत्यवायनाशासम्भवात्। प्रत्येकविघ्ननाशाय भिन्नमङ्गलवत्, इत्यत्र सिद्धान्त सूत्रम्—"तन्त्रवत्"इति। यथा तन्त्रस्य दीर्घसूत्रसमुदायमध्ये सर्वसूत्रमुद्दिश्य कृतेन एकेन विस्तरसूत्रप्रक्षेपेण सर्वसूत्रसम्बन्धो, न तु यावन्ति दीर्घसूत्राणि तन्मध्ये प्रत्येकं प्रस्तारसूत्रप्रक्षेपः कुविन्देन क्रियते, तथा एकया क्षामवत्या सर्वमुद्दिश्य कृतया सर्वदोषसम्बन्धात् सर्वेषामेव नाशः। नाशकस्य नाश्यसम्बन्धे सति नाशे ऽन्यानपेक्षणादिति।

एवं दर्शे प्रयाजादिषण्णामङ्गत्वं श्रूयते। दर्शयागश्चाऽऽहुनित्रयरूपः। तथाच तन्त्रन्यायेन सकृत्कृतेन प्रयाजादिनाऽहुनिष्पत्तिर्न तु प्रयाजादीनां त्रिधा आवृत्तिरिति। प्रयोगविध्यैक्ये तन्त्रता। प्रयोगविधिश्च एभिरङ्गैरिदं कर्तव्यमेवंरूपः। तेन समानाङ्गत्वेनैव तन्त्रता। तथाच देवतैक्ये तन्त्रता। क-

१ नानाफलकसमानाकारकव्यापाराणां मध्ये नानाफलान्युद्दिश्यैकव्यापारकरणं तन्त्रम्।

चिद् द्रव्यैक्येऽपि। किन्तु काम्ययोर्न तन्त्रतेति। नित्ययोर्नित्यकाम्ययोरङ्गयोश्च तन्त्रता। क्षामवत्याः प्रायश्चित्तरूपत्वेनावश्यकर्तव्यत्वात्। "चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये" इतिवाचनिकनित्यत्वाच्च। काम्यानां तन्त्रत्वे यजमानद्वयस्य शिवलिङ्गसहस्रद्वयसंकल्पे एकसहस्रपूजनेनैव निर्वाहः स्यादिति। अयमेव क्षामवतीष्टिन्यायः।

१४ अथ (१)प्रसङ्गन्यायः—

"पशुं प्रोक्ष्य, तन्मांसैर्जुहुयात्" इति श्रुतिः। अत्र पशुप्रोक्षणेन न मांसस्य प्रोक्षणं सिद्ध्यति, तस्य ततो ऽन्यत्वादिति मांसमपि प्रोक्षयेदित्यत्र सिद्धान्तसूत्रम्—"प्रसङ्गात्सिद्धेः" इति। प्रसङ्गो नान्तरीयकत्वम्। तथाच पशुप्रोक्षणेन समन्त्रकेणामन्त्रकं पुरोडाशस्य तन्मांसस्य च प्रोक्षणमपि सिद्धं, तत्र जलसम्बन्धाभावेऽपि पशुघटकत्वेन पुरोडाशस्यापि संस्कारो धान्यराशेरुपरि प्रोक्षणेनाधोवर्तिधान्यानामपि सर्वेषां तद्घटकत्वेन प्रोक्षणवत्॥

'होम्यं यत्काठिनं स्यात्तु पुरोडाश इति स्मृतम्, इति।

तेन मांस-पिष्टकमोदकादीनां होमे विहितानां पुरोडाशसंज्ञेति। तेन समानाङ्गके उद्दिश्य कृते तन्त्रन्यायः। अधिकाङ्गेन न्यूनाङ्गसिद्धौ प्रसङ्गन्यायः। अत्र कुत्रचिदुद्देश्यस्य सिद्धिः, क्वचिदनुद्देश्यस्यापि।

आज्यं यथा—आज्यसंस्कारस्य तद्यागोपयुक्तसर्वाऽऽज्यमुद्दिश्य करणात् कलशस्थाऽऽज्यस्यापि शुद्धिः। नहि राजसूयादियागोपयुक्तं सर्वमाज्यं (२)पात्रे स्थातुमर्हति। नच यदाज्यं ग्राह्यं तद-

१ अन्योद्देशेनान्यदीयस्यापि सहानुष्ठानं प्रसङ्गः।
२ आज्यस्थाल्यामित्यर्थः।

पि संस्कार्यं, तत्सपत्नस्य कुशण्डिकान्तर्गतत्वेनातीतत्वात्। एवं संस्कृतस्रुवापचारे नवीनस्रुवे संस्काराभावः।

द्वितीयं यथा—अधिकपापप्रायश्चित्तेन क्षुद्रपापनाशस्यानुद्देश्यस्यापि सिद्धिः। द्वौश्चकनाशाय पाषाणक्षेपे पिपीलिकादिनाशवत्। माधवीये तु पशुयागार्थं प्रयाजाद्यनुष्ठाने कृते पुरोडाशार्थं न पुनः प्रयाजाद्यनुष्ठानं प्रसङ्गेनोभयाङ्गानुष्ठानादित्युक्तम्।

१५ अथाङ्गस्य प्रधानाऽऽवृत्त्यप्रयोजकत्वन्यायः—

प्रधाननिष्पत्त्यनन्तरं चरोरपचारे ऽङ्गभूतस्विष्टकृद्धोमार्थं न पुनः पाकः। तस्य होमशेषद्रव्येण विहितत्वात्। किन्तु चरुं प्रसाध्य पुनः प्रधानाचरणं स्विष्टकृद्धोमार्थं कार्यमित्यत्र सिद्धान्तसूत्रम्—"अङ्गस्य प्रधानाऽऽवृत्त्यप्रयोजकत्वात्" इति। तेन स्विष्टकृद्धोमं विनैव तत्र कर्म्मनिर्वाहः। एवमेकोद्दिष्टादौ न पुनः श्राद्धाऽऽवृत्तिः। शेषान्नापचारे पिण्डार्थं न पाकान्तरं कार्यमिति। एवमपिण्डकेन मघाश्राद्धेन पक्षश्राद्धनिर्वाहः। अत एव छन्दोगपरिशिष्टम्—

"प्रधानस्याक्रिया यत्र साङ्गं तत्क्रियते पुनः।
तदङ्गस्याक्रियायां तु नाऽऽवृत्तिर्नापि तत्क्रिया" इति॥

१६ अथ योगसिद्ध्यधिकरणम्—

"यः पुत्रकामः स इदं कुर्यात्, यः पशुकामः स इदं कुर्यात्" इत्यादि चतुर्दशतिथियागानुक्त्वा "एकैकस्मै कामायान्ये यज्ञक्रतव उपाहियन्ते सर्वेभ्यो दर्शपौर्णमासान्" इति श्रुतावुक्तम्। यज्ञक्रतू भिन्नौ।

"इष्टिस्तु चरुणा यागो यज्ञस्तु पशुना स्मृतः।
एतच्छेषः क्रतुः प्रोक्तो होमान्यत्पूजनं स्मृतम्॥

यज्ञोऽपीष्टिरेव यजधातोः सिद्धत्वात् । एतच्च "क्रतुयज्ञेभ्यश्च" इति अ० ४ पा० ३ सू० ६८ पाणिनिसूत्रे उक्तम् । सर्वेभ्य इति । प्रक्रान्तपुत्रादिचतुर्दशफलान्युद्दिश्येत्यर्थः । तथाचैकदैव पुत्रपश्वादिचतुर्दशफलकामनया दर्शपूर्णमासौ कार्याविति पूर्वपक्षे जैमिनिसूत्रम्—"योगसिद्ध्यसम्भवात्" इति । योगः साहित्यम् । तथाचैकस्मात्कर्मणः साहित्येन फलासम्भवादित्यर्थः । अयम्भावः । यः पुत्रकाम इत्यादिप्रक्रमेण प्रत्येकमधिकारित्वश्रुतेः तेषामेवान्वयबोधो युक्तो, नतु समुच्चितफलकामस्याधिकारित्वम् । फलानां समुच्चयस्याश्रवणात् । कल्पनायां मानाभावात् । तथाच प्रयोगभेदात्सर्वं फलं भवति नत्वेकप्रयोगेणेति । अत्र च बाधकाभावे सतीति बोध्यम् । तेन यत्र समुच्चयेन फलश्रुतिस्तत्र न दोषः । यथा "स्वर्गमाप्नोति मोक्षं च कार्तिके केशवार्चनात्"इति । अत्र चकारेण समुच्चयबोधः । एवञ्च महाभारतादिश्रवणस्य बहुफलश्रवणेऽप्येकं फलमुद्दिश्य सङ्कल्पः कार्यो न तु समुच्चयेन, तद्बोधकाभावादिति ।

१७ अथ कर्मण्यारम्भाधिकरणम्—

नन्वेकस्माद्दण्डाद्यथा बहुघटोत्पत्तिः । तथैकस्मात् ज्योतिष्टोमाद्बहूनि स्वर्गादिकानि फलानि भविष्यन्तीति किमर्थं पुनः पुनरनुष्ठानाचार इति पूर्वपक्षे सिद्धान्तसूत्रम्-"कर्मण्यारम्भावृत्त्या फलावृत्तिः" इति । अयमाशयः । "ज्योतिष्टोमात्षष्टिवर्षसहस्राणि स्वर्गो भवति" इति श्रुतौ षष्टिवर्षसहस्राणीति व्यर्थं स्यात् । फलानामानन्त्यादनिर्मोक्षश्च स्यात् । एकयागफलाविच्छेदाद्यागान्तरफलप्राप्तिश्च न स्यात् । सूत्रार्थस्तु एककर्मविषयकाऽऽरम्भ आद्यः प्रयत्नस्तस्याऽऽवृत्तेर्यावती संख्या ता-

वत्संख्यं फलं भवतीति । आद्यप्रयाजभेदस्तु कर्मभेदादेव । तथा च प्रधानीभूतादेकस्मात्कर्मण एकमेव भिन्नकालीनं फलं भवतीति । प्रधानीभूतेति प्रयाजादिवारणाय तेषां सकृत्कृतानामेव दर्शत्रयोपकारकत्वेनेत्तत् त्रयमपि फलं तन्त्रप्रसङ्गाभ्याम् । बहुपापनाशककर्मनिवारणाय, 'कुलकोटिं समुद्धरेत्' इत्यत्र तत्तदात्मनिष्ठनानाफलोत्पादककर्मवारणाय च भिन्नकालीनेति ।

१८ अथ शंय्वधिकरणम्-

"सोमयाजी ब्रह्मलोकमाप्नोति" इति श्रुत्या सोमयाजिनो ब्रह्मलोकावाप्तिरुक्ता । अत्र च सोमयागस्य हेतुत्वं न सम्भवति कर्तृविशेषणत्वेनोपस्थितत्वात्कुलालत्ववत् । तथाच ब्रह्मलोकप्राप्तिः कस्य फलमुक्तमित्यत्र जैमिनिसूत्रम्-"शंयुवत्तत्त्वसिद्धेः" इति । अयम्भावः । "देवाः शंयुं बार्हस्पत्यमब्रुवन्, त्वमस्माकमविनाशाय हव्यं वह, ततः शंयुमन्तस्ते ऽरीनजयन्" इति श्रूयते । अत्र शंयुविशिष्टदेवानामरिजयहेतुत्वं प्राप्तम् । बाधकाभावाच्च विशिष्टस्य हेतुत्वबोधे विशेषणस्यापि हेतुत्वम् । कुलालत्वस्य तु न तथा स्वतन्त्रान्वयव्यतिरेकाभावात् । शंयोस्तु तत्तत्त्वाद्धेतुत्वबोधविषयीभूतदेवविशेषणत्वेऽपि हेतुत्वमिति । श्रुत्यर्थस्तु-बृहस्पतिपुत्रं शंयुं देवा अब्रुवन् हव्यं शत्रुनाशकं यागं वह कुरु ततस्तद्यागानन्तरमित्यर्थः । तथा च शंयोः साक्षाज्जनकत्वाभावाद्यथा यागो व्यापारः तथा सोमयागस्यापि अपूर्वं व्यापारः(१) । एवं "सप्तदश पशूनालभेत" इत्यत्र सप्तदशत्वविशिष्टपशूनामङ्गत्वबोधनात् सप्तदशत्वमप्यङ्गमिति ॥

१९ अथ देवताऽधिकरणम्-

(१) तज्जन्यत्वे सति तज्जन्यजनको व्यापारः ।

ननु देवताप्रीतिरेव यागव्यापारो ऽस्तु किमपूर्वेणेत्यत्र सूत्रम्- "देवता चैतन्यासम्भवात्" इति । चेतने एव प्रीतिर्जायते नत्वचेतने तथा च कथं देवताप्रीतिरिति ।

२० अथ परिषदधिकरणम्—

"ब्राह्मणेभ्यो ऽन्नं दद्यात्" इतिं श्रुत्या बहुत्वविशिष्टेभ्य सम्प्रदानं तथा चैकमेवोत्सर्गवाक्यमत्र सूत्रम्-"परिषदि दत्तमदत्तम्" इति । परिषदो बहुत्वविशिष्टस्याचैतन्येन स्वीकारासम्भवात् प्रत्येकमेव दानवाक्यम् । तुलापुरुषादिदाने च वाचनिकत्वाद्बहुत्वविशिष्टा एवोद्देश्याः । तेन बाधकाभावे सतीति विशेषणं सूत्रे इति ॥

२१. अथ कौण्डपायिनामयनाधिकरणम्—

"उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहुयात् तेजस्कामः" इति ।

उपसत् कल्प्यते यत्र सतिलैर्व्रीहिभिश्चरुः ।

तथा च सतिलैर्व्रीहिभिः चरित्वा-चरुं कृत्वा मासं व्याप्याग्निहोत्रं जुहुयादित्यर्थः । अत्र चाग्निहोत्रान्तरविधौ गौरवात् प्राप्ताग्निहोत्रे एव मासव्याप्त्योपसद्विधिः । तेन प्रकृताग्निहोत्रमेवोपसदा कर्तव्यम् । अन्यथा प्रकृताग्निहोत्रं कृत्वा ऽग्निहोत्रान्तराऽऽचरणे गौरवं स्यादित्यत्र सिद्धान्तसूत्रम्-"वाक्यभेदापत्तेः" इति(१)। प्रकृताग्निहोत्रमुद्दिश्य मासोपसदुभयगुणविधौ वाक्यभेदापत्तेः ।

नच मासविशिष्टोपसद्विधिः । गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्स्यात्" इति न्यायादङ्गानामन्योन्यं विशेष्यविशेषणभावविरहादिति । गु-

(१) वाक्यभेदस्य च दुष्टत्वमुक्तमभियुक्तैः-
'सम्भवत्येकवाक्यत्वे वाक्यभेदो न युज्यते' इति ।

णानामङ्गानां परार्थत्वादङ्गत्वार्थत्वादसम्बन्धः परस्परं विशेष्यविशेषणभावविरहः । कुत इत्यत्राऽऽह–समत्वादिति । विनिगमनाविरहादित्यर्थः । तथा च गुणद्वयविशिष्टस्याग्निहोत्रान्तरस्यैव विधिः । अग्निहोत्रपदप्रयोगस्तु तद्धर्मप्राप्त्यर्थ इति । कुण्डसम्बन्धित्वात्कौण्डः पिण्डसोमस्तत्पायिनाम् अयनं–कर्तव्यत्वेन ज्ञानं यत्र तत्कौण्डपायिनामयनम् । अलुक्समासात् यागस्य संज्ञा(१) । कृतसोमयागस्य तत्राधिकारात । केचित्तु कौण्डपायिनां कृतसोमपानानामयनं तदाख्यो यागः । सच द्वादशाहसाध्य इत्यर्थः । षष्ठ्यर्थश्च कर्तृत्वमिति वदन्ति ।

२२ अथ यागदानहोमाधिकरणम्—

बार्हस्पत्ययागे श्रूयते "शरमयं बर्हिरुत्तरतस्त्यजति, तत्र द्रव्याण्यासादयति" इति । अत्र च त्यक्तद्रव्ये कथं द्रव्याऽऽसादनं त्यक्तस्य विनियोगविरहादित्यत्र सूत्रम्–"यागदानहोमान्यत्वे त्यागानुपपत्तेः" इति । अस्यार्थः–या क्रिया यागदानहोमाऽन्या सा न त्यागरूपेति । तथा च शरमयबर्हिषो न त्यागः । तेन त्यजती त्यस्य स्थापयतीत्यर्थः ।

ननु मुख्यशब्दं विहाय लाक्षणिकस्य त्यजतीत्यस्याभिधानं कथम ? इत्थं, "देवा गातु इति मन्त्रेण बर्हिषो होममाचरत्" इति पूर्णाहुत्यनन्तरं बर्हिषो होमविधानादत्र शरस्य बर्हिष्ट्वेन होमप्राप्तौ तद्वारणाय त्यजतीति । तेन त्यक्तधर्मानिदेशात्पुनरनुपादानाच्च न शरस्य होम इति । नचोत्सर्गोऽपि त्याग एवेति कथं त्यागस्य त्रितयान्यतमरूपत्वमिति वाच्यम् । उत्सर्गस्यापि त्यागादिरूपत्वात् । तथाहि–तडागोत्सर्गस्य देवतोद्देश्यकत्यागत्वेन

(१) संज्ञास्वरूपमङ्गभिया षष्ठ्या अलुगित्यर्थः ।

पि सोमसहितफलचमसाभ्यां याग इति ।

२४ अथ पदिन्यायः—

"पदपांसुना यूपमुन्नक्ति, सप्तमं पदम् गृह्णाति" इति सोमयागे श्रूयते । तत्र कस्य पदं ग्राह्यमिति अनध्यवसाये सूत्रम्- "उपस्थितत्यागायोगात्" इति । प्रकरणादुपस्थितायाः सोमक्रयणार्थमानीताया गोरेव पदपांसुर्ग्राह्यः । तथाच पदित्वेनोपस्थितायास्तस्या एव सप्तमं पदं पांस्वर्थं ग्राह्यमिति । "ऐशानीतः सम्पूज्य गामग्निं परिक्रमयति" इति । अग्निप्रदक्षिणारम्भार्थकप्रथमपदचलनावधि सप्तमत्वं बोध्यमिति । एवं "पदे जुहोति" इत्यत्रापि तदेव सप्तमं बोध्यम् । "वर्त्मनि जुहोति" इत्यत्रापि प्रदक्षिणवर्त्म बोध्यमिति ।

२५ अथ स्फ्याद्यिलष्टेज्याधिकरणम्-

"यत स्फ्ये आश्लिष्येत, तदधो मृज्यात, उरुविक्रमाय द्वादशकपालञ्चरुं निर्वपेत" इति श्रुतिः ।

'खड्गाकारः खादिरः स्फ्यश्चरोरावर्तनाय सः' ।

यत-यदि अग्निष्टोमे यागे चरोरावर्तने चरुसंश्लेषः स्फ्ये भवेत्, तत्-तदाऽधो-भूमिभागं मृज्यात्-शोधयेत् । तत्र उरुविक्रमाय-विष्णवे द्वादशकपालं चरुं द्वादशाहुत्यर्थं कुर्यात् ।

'कपालं मृन्मयं पात्रं चक्राघटितमुच्यते ।

आसुरं (१)चक्रघटितं दैवे पित्र्ये च वर्जयेत'

तथाचाग्निष्टोमे स्फ्याश्लेषे सति तन्निमित्तिकामिज्यां कृत्वा ऽग्निष्टोमयागः कार्य इति । तस्या इज्यायाश्च इष्टित्वेन दर्शधर्मप्राप्तेः-सर्वासामिष्टीनां दर्शपूर्णमासौ प्रकृतिः,'प्रकृतिवच्च विकृ-

१ कुलालचक्रेण निर्मितमित्यर्थः ।

तिः' इतिन्यायेन दर्शधर्मस्य पूर्वदिने देवताऽऽवाहनस्य प्राप्तिः। तथा च परदिने स्फ्याश्लेषसंशयेऽपि पूर्वदिने आवाहनं कार्यमेव। अन्यथा सति यागे तत्राङ्गवैगुण्यापत्तिः; इत्यत्र सिद्धान्तसूत्रम्-"न नैमित्तिकत्वात्" इति। नैमित्तिके निमित्तनिश्चयवानधिकारी। तेन पूर्वदिने तदभावान्न यागाधिकारः। प्रधानाधिकाराभावे च कथमङ्गानुष्ठानमिति पूर्वदिने नाऽऽवाहनम्। परदिने स्फ्याश्लेषे सत्यपि नाऽऽवाहनं, तत्र पूर्वादनस्याङ्गत्वादिति तत्राऽऽवाहनबाध एव। निमित्तनिश्चयश्चासति प्रतिबन्धे अवश्यमेव कर्तव्यमित्येवंरूपः। तेन भविष्यद्विवाहादिनिमित्तकमाभ्युदयिककरणं सिद्ध्यति। अन्यथा भाविनि मानाभावेन (१) तेषामनिश्चयात्तत्रापि वृद्धिश्राद्धं न स्यात्। इज्यायां तु तादृशो निश्चयो नास्ति स्फ्याश्लेषसंशयेन संशयादिति।

२६ अथ कृष्णलन्यायः—

"कृष्णलान् श्रपयेत्" इति व्रीहिविकृतियागे श्रूयते। कृष्णलश्च कलापाकारः स्वर्णमाषनिर्मितः। तत्र यागे व्रीहिधर्मावघातमाप्तया तुषाभावेऽप्यदृष्टार्थं कृष्णले ऽवघातः कार्य इत्यत्र सूत्रम्-"द्वाराऽसम्भवात्" इति। अवघातस्य वैतुष्यं द्वारं, तस्य च तत्र स्वतः सिद्धत्वादवघातो व्यर्थः। नचादृष्टार्थः। दृष्टार्थत्वे सम्भवत्यदृष्टार्थत्वकल्पनाया अयुक्तत्वाद्वीरवादिति कृष्णले ऽवघातबाधः।

२७ अथ कपालाधिकरणम्—

"व्रीहिभिर्वायव्यं यजते, अष्टाकपालं पुरोडाशं करोति, पुरोडाशकपालेन तुषान् उपदधाति" इति श्रूयते। अत्र

(१) विवाहादीनाम्।

यागे शूर्पेण न तुषप्रस्फोटनं किन्तु पुरोडाशकपालेन । तत्र चाष्टानां कपालानां सत्त्वात् केन कपालेनेत्यनध्यवसाये सूत्रम् -"प्रथमोपस्थितिस्तन्त्रम्" इति । अयमाशयः- द्रव्यासादने पश्चिमावधि पूर्वान्तं पंक्तिक्रमेण तत्र कपालस्थापनम् । तथाच यजमानसन्निधौ यत्कपालं प्रथमपुरोडाशार्थमासादितं तस्य सन्निहितत्वेन प्रथमोपस्थितत्वेन च तदेव तुषप्रस्फोटनार्थं ग्राह्यमिति । तथाच लक्षणया प्रथमोपस्थितपुरोडाशकपालेन इत्यन्वयबोधः । अत्र पुरोडाशकपालेत्यत्र लक्षणाया आवश्यकत्वात् । लक्षणया यदि पुरोडाशप्रयोजनकं कपालमित्युच्यते तदा तत्र नोपवापाकाङ्क्षा । प्रयोजनवत्त्वेनोपस्थितस्य प्रयोजनान्तरानाकाङ्क्षत्वात् । तथाच तत्र नोपवापान्वयः स्यात् । तेनाधिष्ठाने लक्षणा कर्तव्या । पुरोडाशाधिष्ठातव्यकपालेनेत्यर्थः । अधिष्ठानन्तु स्थितिरेवेति ।

२८ अथार्थवादाधिकरणम्-

"शम्भुः सर्वदेवेश आशुतोषः सर्वकामफलप्रदश्च" इत्यर्थवादः श्रूयते । कार्यान्वितबोधकत्वन्तु सर्वशब्दानाम् । अर्थवादस्य सिद्धार्थकत्वात् अन्वयबोधाजनकत्वात् व्यर्थमेवाभिधानमित्यत्र सूत्रम्-"विधिशेषत्वात्प्रामाण्यम्" इति । विधिशेषत्वात् विध्येकवाक्यत्वात् । तथाच यस्यार्थवादस्य विधिसमभिव्याहारस्तस्य प्रामाण्यमिति । विधिश्च द्विविधः-कल्प्यः कल्प्यश्चेति । तथाचात्र विधिः कल्प्यः । तस्मात् 'सर्वकाम्यकामः शम्भुं यजेत' इति । कल्प्यविधिर्यथा-'वायुर्वै क्षेपिष्ठा(१) देवता' इत्यर्थवादस्य "वायव्यं श्वेतमालभेत" इतिश्रुतविधिनैकवाक्यत्वमिति ।

१ शीघ्रफलदात्रीत्यर्थः ।

२९ अथ विरोधाधिकरणम्—

"औदुम्बरीं स्पृष्ट्वोद्गायति" इति ऐन्द्रयागे श्रूयते । तत्रैव यागे 'सर्वा औदुम्बरी वेष्टयितव्या' इति कात्यायनोक्ता स्मृतिः । तथा च स्मृतेरपि श्रुतिमूलकत्वादुभयोः समबलत्वेन स्पृष्ट्वेत्यत्र श्रुतौ (१)उपस्पर्शलक्षणाया अयोगात्, एवं स्मृताविप सर्वपदसङ्कोचस्यायुक्तत्वादनुपपत्तिरित्यत्र सूत्रम्—"श्रुत्या स्मृतिर्बाध्यते" इति । श्रुतेर्बलवत्त्वादिति भावः । तथा च स्मृतौ सर्वपदे सङ्कोचः—स्पर्शयोग्यभागं विहाय सर्वा वेष्टयितव्येति । नच स्मृतेरपि समानार्थकश्रुतिमूलकत्वमिति वाच्यम् । स्मृत्या ऽनुमीयमाना श्रुतिः प्रत्यक्षश्रुतिविरोधेन स्मृतिसमानार्थिका अनुमातुं न शक्यते किन्तु श्रुत्यनुगुणैवानुमातव्येति । औदुम्बरी—उदुम्बरवृक्षनिर्मिता पशुबन्धनार्थं स्थूणा, तस्या एव यूपसंज्ञेति । माधवीये तु औदुम्बरी उदुम्बरशाखेति व्याख्याता ।

३० अथ प्रतिनिध्यधिकरणम् ।

"व्रीहिभिर्यजेत" इत्यत्र व्रीहेरुपादाने कृते तदपचारे सति यागो न सम्भवति । न च यवोपादानं कार्यं विकल्पे एकोपादाने ऽन्यग्रहणस्य निराकाङ्क्षत्वेनासम्भवेनाशास्त्रार्थत्वादिति पूर्वपक्षे सिद्धान्तसूत्रे—"पूतीकाविधिदर्शनात्" "सारूप्यं तन्त्रम्" इति । तथाच प्रतिनिधिना सदृशेन कर्म्माऽऽचरणीयम् । अन्यथा "यदि सोमं न विन्देत, पूतीकानभिषुणुयात्' इत्यस्य वैयर्थ्यं स्यात् । अयम्भावः—व्रीहिर्न चरुसाधनं, किन्तु तदवयवस्तण्डुलः । तथाच 'व्रीहिभिर्यजेत' इत्यत्र

(१) सर्ववेष्टनस्मृतिबलेन स्पृष्ट्वेति पदस्य वस्त्रव्यवधानेन स्पर्शीकृत्वेत्यर्थे लक्षणाया अयुक्तत्वादित्यर्थः ।

व्रीहिशब्दस्य तदवयवे लक्षणा । तेन व्रीह्यवयवप्रत्यभिज्ञायाः शाल्यवयवेऽपि सदृशत्वदर्शनात् व्रीह्यभावे शालिर्ग्राह्य इति । एतन्न्यायमूलं वचनं ।

"यथोक्तवस्त्वसम्भवौ ग्राह्यं तदनुकारि यत् ।
यवानामिव गोधूमा व्रीहीणामिव शालयः" इति ।

अन्यथा प्रतिनिध्यस्वीकारे "मौद्गश्चरुर्भवति, अयङ्गीया वै माषाः" इति माषनिषेधानुपपत्तिरप्राप्तत्वात् । अत्र च माषा इति बहुवचनं माषमिश्रितमुद्गस्यापि निषेधार्थम् । तथाच प्रतिनिधित्वेन प्राप्त्या निषेधः । एवं 'काण्डमूलपत्रपुष्पफलप्ररोहगन्धरसादिना सादृश्येन प्रतिनिधिं कुर्यात्' इति पैठीनसिवचनादपि यथायथं प्रतिनिधिर्बोध्य इति ।

अत्र वदन्ति—किं तावत्प्रतिनिधित्वम् ? । न हि तत्कार्यकारित्वम् । तत्रैव मुख्ये गतत्वात् । नच तदभावे तत्कार्यकारित्वम् । होमाद्ययोग्येन यजमानेन संकल्प्य यागादौ प्रतिनिधिकरणे यजमानस्य सत्त्वेन तत्प्रतिनिधावगतत्वात् । नच तदभाव इत्यस्य तदयोग्यत्वे इत्यर्थः । विज्ञेनापि यजमानेन वाचनिकप्रतिनिधिकरणे ऽसत्त्वात् । 'होतारं वृणुयात्' इति विधेः । न च तत्र होता न प्रतिनिधिः किन्त्वङ्गमेव, तत्र स्वयं प्रक्षेपस्य विधानात् । होता तु न यागकर्ता तस्य द्रव्ये स्वत्वाभावात् किन्तु प्रक्षेप्तोच्यते । मुख्ये यागे यागरूपे यजमान एवाधिकारी, अतो लक्षणं युक्तमेवेति वाच्यम् । तथाऽप्यन्यकार्यस्यान्याजन्यत्वात् । व्रीहित्वेन कारणत्वस्य श्रुतत्वात् । अन्यथा व्रीहेर्व्यभिचारेण जनकत्वं न स्यात् । उच्यते । तथागत्वेन तत्र विहितचरुत्वेन-एवं तच्चरुत्वेन तत्र विहितद्रव्यत्वेन कार्यकारणभावस्य वाच्यत्वादुक्तमेव लक्षणमिति ।

विशेष्या इति स एव आदरणीयः । तेनाग्निमजापतिभ्यां स्वाहेति वाच्यम् । "द्वन्द्वात्परः" इति न्यायस्तु यत्र साहित्यान्वयो योग्यस्तत्परः । यथा शस्त्राशस्त्रहतानामिष्टादौ । 'इन्द्राग्निलोकमाप्नोति तत्तीर्थे स्नानमात्रतः' इत्यादौ चेन्द्राग्न्योरेकलोकाभावादिति । तथाच मनोहामन्त्रे अग्न इति पदस्य सोमसाहित्ये लक्षणा । नच लक्षणा स्वार्थहानि-परार्थकल्पना-दोषद्वयदुष्टेति वाच्यम् । अनन्यगतिकत्वात् ।

अथ विकल्पः—स द्विविधः । ऐच्छिको व्यवस्थितश्च । आद्यो यथा-"व्रीहिभिर्यजेत" "यवैर्वा यजेत" इत्यनेन यागे हेतुत्वमुभयोर्बोध्यते । तत्र चैकसाधनावरुद्धे साधनान्तरविधेर्निराकाङ्क्षतापत्त्या विकल्पार्थं वाशब्दः यवैर्वेति । वाशब्दार्थश्चान्यतरव्यवच्छेदेनान्यतरान्वयः । तेन व्रीहौ यवाभावः । सहकारियवे व्रीह्यभाव इति । नच व्रीह्यभावे यव इति यवस्य पश्चादुपदेशात् प्राप्यते, यवाभावे व्रीहिरिति कुत इति वाच्यम् । व्रीहिजन्यपुरोडाशे यवस्य सहकारित्वे व्रीह्यभावे यव इत्येव न स्यात् । नच समुच्चय एव कथं न कल्प्यते इति वाच्यम् । तर्हि एकस्य यजतिपदस्य वैयर्थ्यापत्तेः । तथाच यजेतेति पदेन प्राधान्येनैवोभयस्य हेतुत्वं बोध्यते । तच्च विकल्पं विना ऽनुपपन्नमिति । तेन यवजन्यपुरोडाशे व्रीह्यभावः कारणमवच्छेदको वा । नच यत्रोभयमस्ति तत्र को ग्राह्य इति वाच्यम् । तत्र यागाभाव एवान्यतराभावविशिष्टस्याऽन्यतरस्याभावात् इति पूर्वपक्षे सूत्रम्—"इच्छातो नियम" इति । तेन तुल्यबलयोर्विकल्प ऐच्छिकः । तथा च यत्र व्रीहिमात्रमस्ति पुरुषस्य तु न तत्रेच्छा, तत्र यागनिवृत्तिरेव । एवं यवेऽपि ।

ऐच्छिकविकल्पे ऽष्टौ दोषा यथा-स्वार्थस्य व्रीहेस्त्यागः, प-

काम्यत्वेन तत्र विलम्बितायधिकारात् । श्राद्धस्य नित्यत्वेन झटित्यधिकारात् । तत्काले ऽधिकृताकरणेन प्रत्यवायप्रसङ्गात् । श्राद्धानन्तरञ्च दानानिषेधात्तदुत्तरमपि न स्यादिति दानस्य बाध एव स्यात् । नच दानविधिबलाद्भविष्यति दानविधेः श्राद्धानधिकारिजीवत्पितृकादिपरत्वेनोपपत्तेः । उच्यते—

'स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने'

इति वचने, तथा—

'स्नाने दाने तथा जप्ये होमे श्राद्धे सुरार्चने ।
पुण्यः स कालो भविता नित्यमेव सुरेश्वर' ॥

इति वचने च स्नानानन्तरं दानस्य पाठात् श्राद्धात् पूर्वं पाठाच्च दानमेवाऽऽदौ । तदानीं श्राद्धाकरणेन जातस्य प्रत्यवायस्य पश्चात् श्राद्धकरणेन नाशात् । यथा शरदि नवश्राद्धाऽनाचरणजन्यप्रत्यवायस्य गौणकाले दृश्चिके करणेन नाश इति ।

अत्रेदं बोध्यम्—यदि स्वल्प उपरागे कालः तदा श्राद्धमेव कर्तव्यं नित्यबाधेन काम्यस्यान्याय्यत्वात् । यदि स्नानतर्पणाभ्यामेव कालो गच्छति तदा कालाभावात् श्राद्धं नास्त्येव ।

३७ अथ तदन्तापकर्षन्यायः—

"अनुदिते जुहोति" इत्यनेनारुणोदये होमस्य कर्तव्यता विहिता । स्नानकालोऽपि स एव । तथा च निरवकाशत्वाद्धोम एव कर्तव्यस्तदानीं न स्नानं, तत्पूर्वञ्च न स्नानं रात्रित्वात् । तेन स्नानं विनैव होमः । तेन 'स्नातो अधिकारी भवति' इत्यत्र (१)सङ्कोच इति पूर्वपक्षे सूत्रम्—"तदन्तापकर्षादुपपत्तेः" इति । रात्रावलक्ष्मीः कालकर्त्री । दुःस्वप्नेन्द्रियश्रवणादिना

(१) अनुदितहोमकर्त्रतिरिक्ततयेति भावः ।

अशौचं जातम् । नहि सति अशौचे होमः । अतः स्नानं तत्पूर्वं कर्तव्यं सन्ध्यावन्दनञ्च पूर्वं सन्ध्यावन्दनहीनस्य कर्मानर्हत्वबोधनात् । सूत्रार्थस्तु तदन्तत्वादपकर्षः—तस्य पूर्वकर्तव्यतेति । तथा च स्नानानन्तरैकर्तव्यत्वात्स्नानस्यापकर्षः । विहितकालं विनाऽपि पूर्वाचरणमिति । तेनारुणोदयस्नानविधिरनुदितहोमीतरपरः ।

३८ अथ तदाद्युत्कर्षन्यायः—

उत्कर्षः स्वकालं विहायोत्तरकालकर्तव्यता । तथा च यत्कर्म तदादिभूतं तत्स्वकाले ऽकृत्वा तदुत्तरकाले कर्तव्यम् । यथा सपिण्डनं स्वकाले ऽपराह्णे कृत्वा तद्दिवसीयं सांवत्सरिकं मध्याह्नाभावेऽपि कर्तव्यं सपिण्डनस्य तदादित्वात् । नच तदन्तापकर्षन्यायात्सपिण्डनं पूर्वाह्णे कृत्वा सांवत्सरिकं मध्याह्ने क्रियतामेकस्य कालत्यागे विनिगमनाभावादिति वाच्यम् । सपिण्डनस्य भावरूपपितृत्वप्राप्तिफलकत्वात् । भावात्मकफलं तु मुख्यकालेनैव भवतीति । सांवत्सरिकस्य प्रत्यवायपरिहारमात्रार्थकत्वेन गौणकालेऽपि सम्भवात् ।

अत्र केचित्—

'तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते'

इतिवचनात् सपिण्डनात्पृथक् न सांवत्सरिकं कर्तव्यमिति वदन्ति । तन्न—

'असंक्रान्तेऽपि कर्तव्यमाब्दिकं प्रथमं द्विजैः ।
तथैव मासिकं पूर्वं सपिण्डीकरणं तथा' ॥

इत्यस्य निर्विषयत्वापत्तेः । तेनैव च सपिण्डत्वमिति वचनस्यानाकरत्वात् । साकरत्वेऽपि एकादश्यादिक्रियमाणपतितसपिण्डनपरमिति ।

३९ अथ संयोगपृथक्त्वन्यायः—

"खादिरे पशुं बध्नाति" खादिरं वीर्यकामस्य यूपं करोति" इति श्रुतिभ्यां खादिरस्य नित्याङ्गत्वम्, काम्याङ्गत्वञ्च बोधितम्। काम्यञ्च कामनासापेक्षत्वादनियतम्। तथाच सति अनियमसंयोगविरोधः। संयोगः सम्बन्धः प्रकृते तादात्म्यमिति यावत्। नच खादिरः काम्य एव। तथा काम्यत्वेन प्राप्ते खादिरे पशुबन्धनाश्रयत्वमात्रं "खादिरे पशुं बध्नाति" इत्यनेन विधीयते। तेन यत्र कामनाविरहाद्यूपाभावस्तत्र पशुबन्धनाभाव एवेति वाच्यम्। खादिरे इत्यस्य सप्तम्यन्तस्य वैयर्थ्यापत्तेः। सान्निध्यादेवाश्रयलाभात्। यस्यानियताङ्गत्वं तत्र नित्याङ्गत्वं नास्त्येव। यथा "चमसेनाऽपः प्रणयेत्, गोदोहेन पशुकामस्य" इति। चमसो—यत्काष्ठनिर्मितं प्रणीतार्थं पात्रं सः। गौर्दुह्यते ऽत्रेति गोदोहो दोहनपात्रम्। गोदोहेनाऽपां प्रणयनं कामनासत्त्वे एवेति तस्यानियताङ्गतेति। तथा च खादिरे नियतत्वमनियतत्वञ्च विरुद्धमित्यत्र सूत्रम्—"एकस्योभयत्वे संयोगपृथक्त्वम्" इति। एकस्याङ्गस्योभयत्वे नित्यत्वकाम्यत्वोभयत्वे संयोगयोः प्रयोजकधर्मसम्बन्धयोः पृथक्त्वं द्वित्वं प्रयोजकमिति। नियताङ्गत्वप्रयोजकं यागं प्रति नियतपूर्वसत्त्वं, काम्याङ्गत्वप्रयोजकं यागं प्रति नियतपूर्वासत्त्वं यस्याङ्गत्वप्रयोजिका कामना। एतदुभयसम्बन्धयोः पृथक्त्वमस्त्येव। खादिर इति। अयम्भावः—यूपे पशुं निबध्नाथ प्रोक्षयेदालभेत। तत्र परिभाषया यूपे पशुनिबन्धनमावश्यकम्। ततः खादिरयूपस्य नियतत्वमेव। तत्रैव यूपे काम्यत्वं बोधितम्। अग्निना नियतत्वं कर्तुं समर्थम्। अतो ऽत्र न नित्यत्वकाम्यत्वयोर्विरोधः। तेन यस्य न कामना तेनापि खादिरः कर्तव्य एवेति। माधवीये तु "खादिरे पशुं बध्नाति"

इत्यत्र "खादिरो वै यूपो भवति" इति पाठो लिखितः । गोदोहे तु कामनासम्बन्धमात्रम् । अयञ्च न्यायो ऽङ्गविषयो जातेष्टिन्यायस्तु प्रधानविषयः ।

४० अथ व्यक्तिवचनन्यायः—

"आग्नेय्या जुहोति" इति श्रूयते । आग्नेयी अग्निप्रकाशिका ऋक् । तस्याश्च स्थाने स्थाने नानाविधायाः श्रुतत्वात् सर्वा एव ग्राह्या इति केचित्, तन्न । प्रच्छन्नवेदवर्त्तितादृशऋक्शङ्कया ऽप्रवृत्तेः । तथा च यस्यामृचि इच्छा तयैव जुहुयादित्यत्र सिद्धान्तसूत्रम्—"व्यक्तिवचनानां सन्निहितविशेषपरत्वात्" इति । व्यक्तिमात्रवाचकपदानां सन्निहिततरसन्निहिततमसन्निहितपरत्वात् । व्यक्तिवाचकास्तु योगार्थमात्रपुरस्कारेण प्रवृत्ताः पाचकादिशब्दाः । पाचकशब्दः पाककर्ममात्रे प्रयुज्यते । पाचकमात्रवृत्तिधर्मश्च न पाककर्तेति न तत्र प्रयोगः । एवञ्चाग्नेयीपदमपि व्यक्तिमात्रवाचकम् । अग्निर्देवता अस्या इति योगार्थत्वात् । तथाच सन्निहितैव ऋक् ग्राह्येति । मीमांसकमते रूढं घटादिपदं जातिवाचकम् । योगार्थप्रवृत्तम्पदं व्यक्तिमात्रवाचकं तत्र समुदायशक्त्यभावादिति। तेन गां दद्यादित्यत्र यत्रेच्छा तां गां दद्यात् । तत्र नायं न्यायः व्यक्तिवाचकत्वाभावादिति ।

४१ अथ षणपुराणन्यायः—

"पुराणं षोडश पणा" इत्यत्र षोडशपणघटितं पुराणं श्रुतं तत्र च षोडशत्वं चरमव्यक्तेः । तथाचान्येषां पणानां कथं तद्घटकत्वमिति चेन्न, प्रत्येकापेक्षया सर्वेषां षोडशत्वात् ।

४२ अथ दण्डापूपन्यायः—

पिष्टकेषु पाकार्थं स्थाल्यामधिश्रितेषु एकस्मिन् पक्वे तदुद्ध-

रणं मूल्यग्रेण दण्डेन क्रियते। अत्र च अपूपस्योद्धरणे दण्डस्योद्धरणं भवतीति।

४३ अथ द्यूतपणन्यायः—

द्यूते प्रथमक्रीडायां यः पणः कृतः ततो द्विगुणः पणो द्वितीयवारक्रीडायां पराजयिना दुःखात्क्रियते। एवं तृतीयवारं दारपितृगुणादि। अत एव जिकनभट्टेन प्रथमप्राजापत्यानन्तरं द्वितीयादिप्राजापत्ये दुःखाधिक्यादेकधेनुनाचिता किन्तु धेनुद्व्यादीत्युच्यते।

४४ अथ कपिञ्जलाधिकरणम्—

"कपिञ्जलानालभेत" इति श्रुत्या कपिञ्जलगतं बहुत्वं बोधितम्। तच्च विवक्षितं विधेयगतसंख्यात्वात्। कपिञ्जलस्यान्यतो ऽप्राप्तत्वाद्विधेयत्वम्। बहुत्वञ्च त्रित्वमारभ्य परार्द्धपर्यन्तमित्यनध्यवसायेनाप्रवृत्त्या तद्वेदाप्रामाण्यापत्तिरित्यत्र सूत्रम्—"प्रथमोपस्थितेस्तन्त्रत्वात्" अ०११पा०१सू०४३ इति(१)। त्रित्वोत्पत्त्यनन्तरं त्रित्वसहितैकत्वेन चतुष्ट्वं जन्यते इति मते त्रित्वस्य प्रथमोपस्थितत्वात्तदेव बोध्यते। यस्य मते ऽपेक्षाबुद्धिविशेषमहकृतेनैकत्वत्रयेण त्रित्वं जन्यते इति, तन्मते चतुष्ट्वोत्पत्तिकाले त्रित्वस्यानुपस्थितत्वान्न पूर्वव्याख्या समीचीना। किन्तु प्रथमोपस्थितिशब्देन लाघवमुक्तम्। तथाच व्यक्तिलाघवात् त्रित्वमेव बहुत्वमिति। कपिञ्जलो जलचरः पक्षिविशेषः।

४५ अथ तक्षसूत्राधिकरणम्—

"पर्यङ्कीयतक्षसूत्रे च्छिन्ने आयुषीमिष्टिं निर्वपति" "आश्वन्यां जुहोति" इति श्रुतिः। पर्यङ्कपरिमाणज्ञापनार्थं तक्ष्णा

(१) "प्रथमं वा नियम्यते कारणादतिक्रमः स्यात्" इति पाठः।

यत्सूत्रं पर्यङ्कार्थककाष्ठे ऽर्पितं तस्य दैवाच्छेदे इत्यर्थः । अत्र च इष्टेः प्रधानत्वकल्पने फलकल्पनाऽधिकारकल्पनयोर्गौरवापत्त्या (१)पर्य्यङ्कस्यैवाङ्गित्वं कल्प्यते इति पूर्वपक्षे सूत्रम्—"अलौकिकस्य लौकिकाङ्गत्वायोगात्" इति । अयम्भावः—अङ्गस्य प्रधानविधिसापेक्षत्वं नियतम् । पर्य्यङ्के च प्रधाने विध्यभावादिष्टेर्न तदङ्गत्वं किन्तु सूत्रच्छेदनिमित्तकं तत्सूचितामङ्गलनाशाय कर्मान्तरमेवेति ।

४६ अथ आरम्भणीयन्यायः—

"आग्नावैष्णवमेकादशकपालं निर्वपेत् दर्शपूर्णमासावारिप्समानः" इति श्रुतावारम्भणीयेष्टेर्दर्शपूर्वकाले कर्तव्यता बोधिता । तथा तस्या दर्शाङ्गत्वमेव कल्प्यते कर्मभेदे गौरवादित्यत्र सिद्धान्तः—"तस्या अतः सफलत्वात्" इति(२) । यथा "आग्नावैष्णवमारम्भणीयाख्यं जुहोति वसुकामः" इति श्रुत्या सफलत्वबोधनात्, तदेकवाक्यतया चैकमेव कर्मेति । तथा चारिप्समान इत्यनेन दर्शारम्भकालकर्तव्यत्वमात्रं बोधितं नत्वङ्गत्वमिति ।

४७ अथाङ्गस्य प्रधानकालान्वयाऽनन्वयौ—

शिखाबन्धनस्याङ्गत्वं "विशिखो व्युपवीतश्च यत्करोति न तत्कृतम्"इत्यनेन श्रूयते । कर्मभेदे ऽङ्गानां भेदादङ्गस्य प्रधानकालान्वयनियमात् प्रतिकर्म पृथक् पृथक् शिखाबन्धनं कर्तव्यमि-

(१) पर्यङ्केष्टेरेवेत्यर्थः ।

(२) "सकृद्वा ऽऽरम्भसंयोगादेकः पुनरारम्भो यावज्जीवप्रयोगात्" (अ० ९ पा० १ अधि० ११ सू० ३५) इति सूत्रं भाष्यादिपुस्तकेषु दृश्यते ।

स्यत्र सिद्धान्तः—साधारणे ऽङ्गे प्रधानकालान्वयानियमात् किन्तु असाधारणे प्रधानप्रयोगान्तर्गतेऽङ्गे प्रधानदेशकालान्वयनियमः । श्राद्धादिपूर्वदिनकर्तव्यनिमन्त्रणादिवारणाय प्रधानप्रयोगान्तर्गते इति ।

४८ अथ समं स्यादश्रुतित्वादिति न्यायः—

"अश्वं प्रस्तोतृप्रतिहर्तृभ्याम्" इति यागविशेषे एकाश्वदक्षिणोभयोः श्रूयते । अत्र कीदृशो भाग इत्यत्र सिद्धान्तः-"समं स्यादश्रुतित्वात्" (अ० १० पा० ३ अधि० १३ सू० ५३) इति । समभागकल्पनमित्यर्थः(१) ।

४९ अथानेकार्थत्वाकल्पना—

"आदित्यो वै यूपो भवति" इति । अत्राऽऽदित्यपदेन आदित्यवर्ण उच्यते । आदित्यस्य यूपत्वासम्भवात् । तथा च आदित्यपदस्य आदित्यवर्णे शक्तिरेवाऽऽदित्यपदप्रयोगादित्यत्र सूत्रम्-"अन्यायश्चानेकार्थत्वम्" इति । लक्षणयाऽप्युपपत्तौ न शक्तिः कल्प्यते। शक्तिकल्पने नानार्थता स्यात् सा चायुक्ता । अत्र च बोधकाभावे सतीति बोध्यम् । तेन हरिपदादौ न दोषः । तत्र शक्तिग्राहकमानस्य कोशस्य बोधकत्वादिति ।

५० अथ प्रक्रमाधिकरणम्—

"मनसा सङ्कल्पयति, वाचा ऽभिलपति, कर्मणा चोपपाद-

---

(१) वस्तुतस्तु इदं सूत्रं पूर्वपक्षसाधकम् । "अतुल्याः स्युः परिक्रये विषमाख्या विधिश्रुतौ परिक्रयान्न कर्मण्युपपद्यते दर्शनाद्विशेषस्य तथाऽभ्युदये" इति सूत्रेण—दीक्षावाक्ये प्रतिहर्तुस्तृतीयित्वसमाख्यानात् प्रस्तोतुश्चाद्वित्वश्रुतेः समाख्याश्रुतिबलाद्विषमैव दक्षिणेति सिद्धान्तितम् । उभयसमुदायस्याचेनत्वेन सम्प्रदानत्वासम्भवाद्दक्षिणा विभज्यैव दातव्येति च भाष्यादितोऽवगन्तव्यम् ।

यति, प्रक्रमे च सकुशतिलं सलिलं त्यजति" इति श्रुत्या प्रक्रमे कर्मारम्भसमये कुशतिलसहितजलत्यागो विहितः। आरम्भश्च मनसा सङ्कल्पयतीत्यनेन बोधिता कर्मेच्छैव। तथा च कर्मकरणेच्छाकाल एव सलिलत्याग इत्यत्र सिद्धान्तः—"तस्याः प्रक्रमत्वासम्भवात्" इति। इच्छायाः पूर्वमासपूर्वदिनादावपि सम्भवात्तस्या न प्रक्रमत्वं किन्त्वभिलाषस्य। तथा चाभिलाषनिष्पत्तौ सकुशतिलजलत्यागः कार्य इति।

५१ अथ पृथग्विधौ गुणविधानासम्भवः—

"स्वर्गं नयति चात्मानं तथा पितृगणानपि।
कल्पे यः स्नाति तपसि यत्किञ्चित्सलिलाशये"॥

इति श्रूयते। कल्पे—उषसि। तपसि—माघे। अत्र च न कर्मान्तरविधिः, किन्तु प्राप्तनित्यस्नाने माघाख्यगुणविधिरिति तेन पृथक् न सङ्कल्प इत्यत्र सिद्धान्तः—"पृथग्विधाने गुणविधानायोगात्" इति। पृथग्विधानं प्रकरणान्तरे विधानम्। नित्यस्नानप्रकरणे माघस्नानाविधानात्कर्मान्तरमेवेति।

५२ अथ सर्वशक्त्यधिकरणम्—

ननु नित्यस्य यथा किञ्चिदङ्गहान्याऽपि सिद्धिस्तथा काम्यस्यापि स्यात् विहितत्वाविशेषादित्यत्र सिद्धान्तसूत्रम्—"काम्ये सर्वशक्तिमानधिकारी" इति। अयमर्थः— काम्यापूर्वं प्रति तत्तदङ्गानां हेतुत्वेनैकस्याप्यभावे काम्यापूर्वानिष्पत्तेः। नित्ये तु काम्यापूर्वं नास्ति, किन्तु नित्यानाचरणस्य प्रत्यवायहेतुत्वम्। तथा च शक्त्यावदङ्गसहितमधानानाचरणस्य प्रत्यवायहेतुत्वं कल्प्यते नित्ये प्रतिनिध्युपदेशात्। अशक्तावन्नोत्सर्गमात्रेण श्राद्धनिर्वाहविधानाच्च शक्येति विशेषणम्।

एतच्च बोधकाभावे सतीति बोध्यम् । "यदि सोमं न विन्देत्, तदा पूतीकानभिषुणुयात्" इति बोधकम् । तथा च सोमप्राप्त्या सङ्कल्पेन कर्मारम्भे सति यदि सोमापचारस्तदा पूतीको ग्राह्यः । आरब्धसमापनस्याऽऽवश्यकत्वात् । नतु प्रथममेव सोमालाभे पूतीकानादाय सङ्कल्प इति ।

५२ अथ तिर्यगधिकरणम्-

यथा जैमिनिसूत्रम्-"तिर्यक्पङ्गुत्र्यार्षेयदेवानां कर्मसु नाधिकारः" इति(१) । तिरश्चां विशिष्टज्ञानाभावात्, पङ्गोः प्रचरणशक्त्यभावेन 'उत्थाय पूर्णां जुहोति' इति कर्मणो बाधात्, त्र्यार्षेयेति-त्रय आर्षेया ऋषिधर्मा येषां ते त्र्यार्षेया अन्धमूकबधिराः । यथा-कश्चिदृषिः परद्रव्यादिवीक्षणे रागोत्पत्तिसम्भवेन नयने निमील्य तिष्ठति न किञ्चित्पश्यति । एवं कश्चिदृषिः परद्रोहमिथ्यावचनसम्भवेन यत्किञ्चिन्न वक्ति, मौनी तिष्ठति । तथा कश्चिदृषिः परनिन्दाश्रवणजन्यदोषपरिहाराय वनान्तं गत्वा तिष्ठति, किञ्चिन्न शृणोतीति । तथाचान्धस्य वीक्षणाभावात् 'यजमानवीक्षितं हविर्जुहोति' इत्यादिबाधात्, मूकस्य मन्त्रोच्चारणासामर्थ्यात्, बधिरस्य श्रोत्राभावेन लौकिकवैदिकव्यवहाराभावात्, देवानान्तु मन्त्रमयत्वेनाचेतनत्वात् । अत एव देवग्रामो हस्तिग्राम इत्यादयो गौणप्रयोगाः ।

अत्र वदन्ति—तिरश्चां विशिष्टज्ञानाभावात्, देवानां विग्रहशून्यत्वेनाचेतनत्वात्प्रसक्तिरेव नास्ति कथमधि-

(१) "कर्तुर्वा श्रुतिसंयोगाद्विधिः कात्स्न्र्येन गम्यते" (अ० ६ पा० १ अधि० २ सू० ५) इति पाठो ऽन्यपुस्तकेषु ।

कारनिषेधः । अन्यथा (१)घटादीनामपि निषेधो बोध्येत । तत्राहुः-येषां तिरश्चां विशिष्टज्ञानमस्ति वालिसुग्रीवादीनां, तेषामनधिकारबोधनात् । देवानां तु विग्रहसत्त्वेन चैतन्यमस्त्येव "इन्द्रः सहस्राक्षः" इति श्रुतेः । किन्तु तेषामेकदा नानायागसान्निध्यासम्भवेन यागीयदेवतात्वासम्भवात् मन्त्रस्य देवतात्वमुच्यते । तथा च देवानां यागोद्देश्यत्वयागकर्तृत्वाविरोधान्न कर्मण्यधिकारः ।

वस्तुतस्तु तिरश्चां वर्णाश्रमाभावादेवानधिकारः प्राप्त एव । देवानान्तु मध्ये यो यष्टा स स्वं विहायान्येषां करणे ऽविरोधात्, यथा कृष्णले ऽवघातबाधः । तथा स्वोद्देश्यकयागबाधेऽपि न कर्मवैगुण्यमिति । यत्र चान्यमात्रदेवतायागस्तत्र स्वाच्छन्द्येनाधिकारः । एवं दानेऽपि । अत एवेन्द्रादीनां महाभारतादौ यागश्रुतिरप्युपपन्नेति ।

५४ अथ पञ्चमाधिकरणम्—

"पशुना रुद्रान् यजेत" इति श्रूयते । अत्र बहुरुद्रोद्देश्यकैकपशुरनुचितो ऽतो रुद्रसमसंख्याः पशवो ग्राह्या इतिपूर्वपक्षे जैमिनिसूत्रम्—"असति बाधे वैमक्तिकसंख्याया अत्यागात्" इति(२) । पशोर्विधेयतया तद्गतसंख्या विवक्षिता । रुद्रानिति बहुवचनेन साहित्येन देवतात्वबोधनाच्च प्रोक्षणे नानुपपत्तिः । रुद्रेभ्यः प्रोक्षयामीति सकृदेव प्रोक्षणादिति ।

५५ अथ सहसाहित्यविवेकः—

तुल्यक्रियाणां (रूपाणां) परस्परसापेक्षाणामेकक्रियार्हत्वं

---

(१) घटस्थजलप्रतिमादीनामिति यावत् ।

(२) एतदधिकरणसिद्धान्तसूत्रं-"शब्दवत्त्वूपलभ्यते, तदागमे हि तद् दृश्यते तस्य ज्ञानं हि यथा अन्येषाम्" (अ० ४ पा० १ अधि० ५ सू० १५) भाष्यादिपुस्तकेषु ।

साहित्यम् । (१)अनेवम्भूते सहत्वमिति । तुल्यरूपत्वञ्च तत्क्रियान्वयेकतरधर्मिविशेषणत्वेनान्यतरस्यानुपस्थितत्वम् । तेन—

"दामोदराय नभसि तुलायां लोलया सह ।
प्रदीपं ते प्रयच्छामि नमो ऽनन्ताय वेधसे" ॥

इत्यत्र सहत्वमेव दामोदरविशेषणत्वेन लोलाया उपस्थितेः । उक्तञ्च तुल्यरूपत्वं 'घटं पटञ्च पश्यति' इत्यत्राप्यस्ति एकस्याः क्रियायाः समूहालम्बनात्मिकाया विषयत्वात्, साहित्यं तु नास्त्यतः परस्परसापेक्षाणामिति । तत्क्रियान्वयिपदार्थनिरूप्यधर्मोपस्थितिविषयाणामित्यर्थः । "अग्नीषोमाभ्यां स्वाहा" इत्यादिलक्ष्ये द्वित्वादिः साधर्म्यम् । सहस्थले तु लोलायुतदामोदरत्वम् । तेन धर्मेणोभयोरुपस्थितिविषयत्वञ्च । चैत्रमैत्रौ स्वग्रामौ गच्छत इति वारणाय एकक्रियेति । तत्र गमनक्रियायाः प्रत्येकं समाप्तत्वात् । ननु तथापि द्वन्द्वेन कथं साहित्यबोधः ? वचनक्रियापेक्षया साहित्यात्, क्रियायां शब्दोपात्तत्वविशेषणाभावादिति ।

५६ अथ खलेवालीन्यायः—

सोमयागविकृतौ "खलेवाली यूपो भवति" इति श्रूयते । खलेवाली बलीवर्दबन्धनाय खले निखातस्य पेढिकाष्ठस्य संज्ञा । तथा च यूपधर्मा अष्टाश्रीकरणादयः अत्रापि कार्या इति(२) ।

---

(१) अतुल्यरूपाणामित्यर्थः ।

(२) वस्तुतस्तु खलेवालीस्वरूपभङ्गभिया अष्टाश्रीकरणतक्षणादियूपोत्पत्तिसाधनसंस्काराणां बाध एव । ये तु खलेवालीस्वरूपाविरोधिनो यूपसंस्काराः पर्यूहणादयस्ते एवात्र कार्या इति। स्पष्टञ्चेदं सुबोधिन्यां दशमाध्याये (पा० २ अधि० ३२ सू० ६९)

५७ अथ प्रतिपत्त्यधिकरणम्—

"शकृत्संप्रविध्यति, लोहितं निरस्यति, गुदेनोपयजति, सर्वं जुहोति" इत्याग्नीषोमीयपशौ श्रूयते। शकृत्संप्रविध्यतीति दृष्टान्तार्थम्। यथा पशोरुदरवर्ति शकृत् त्यजति, तथा लोहितमपि त्यजति। अन्यत्र पशौ क्षीरमांसोपक्रमेण होमः। अत्र तु गुदमांसोपक्रमेणेति। तथा च "यज्ञशेषमृत्विग्भ्यो ददाति" इति परिभाषया मांसस्य उत्तरा प्रतिपत्तिः प्राप्ता। अत्र च सर्वप्रहरणेन प्रतिपत्त्यभावात्कर्मवैगुण्यं स्यादित्यत्र सिद्धान्तः—"यदि कारानुपपत्तेः" इति। यदि प्रतिपाद्यं स्यात्तदा प्रतिपत्तिरङ्गमित्यर्थः।

५८ अथ आष्टमिकविकृत्यधिकरणम्—

दर्शदिवसमपेक्ष्याष्टमदिने क्रियते इत्याष्टमिकी विकृतिर्दर्शयागस्य। यथा श्रुतिः—"अष्टमे हि सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः" इति। अस्य यागस्येष्टित्वेन दर्शविकृतित्वम्। तथाच दर्शधर्मातिदेशेन षट्विधहोमद्रव्याङ्गकत्वं प्राप्तम्। तथा चात्र सौर्यमिश्रैकवचनश्रुतावपि चरुषट्कं कार्यं करणगतषट्त्वस्यापि प्राप्तत्वात् इति पूर्वपक्षे सिद्धान्तः—"एकोद्देश्यकत्वेनाकांक्षितत्वात्" इति। अत्रैकदेवतायाः सूर्यस्योद्देश्यत्वेन एकचरुरेवाकांक्षितः। अतो ऽतिदेशप्राप्तस्यापि षट्त्वस्य बाध एव। दर्शे तु षट्द्रव्यस्यैव देवताभिधानादिति।

५९ अथ धान्यमस्यधिकरणम्—

"धान्यमसि,इति तण्डुलानावपति" इति श्रूयते। अत्र मन्त्रलिङ्गेन धान्यप्रकाशनात्तण्डुलशब्दो धान्यपरः। युक्तश्चैतत्। तण्डुलपरत्वे ऽवघातबाधापत्तेरित्यत्र सिद्धान्तः—तण्डु-

लानिति द्वितीयया क्रियाजन्यफलस्य संस्कारविशेषस्य तण्डुले बोधनात् । मन्त्रलिङ्गेन चानुमितिद्वारा धान्ये संस्कारबोधः, तस्य च विलम्बितत्वात् । यथा-इदमावपनं धान्यनिष्ठसंस्कारजनकं धान्यप्रकाशकमन्त्रकरणत्वादिति । तथा च श्रौतान्वयबोधबलात्तण्डुलस्य कर्मत्वे प्राप्ते कृष्णलन्यायेनावघातबाधो न दोषाय । तथा च मन्त्रे धान्यपदं लक्षणया तण्डुलपरामिति ।

६० अथ ऊहाधिकरणम्—

"अग्नये त्वा जुष्टं निर्वपामि" इति मन्त्रः प्रकृतौ श्रुतः । तथा विकृतौ सौर्यचरावपि अग्नये इत्येव पाठ्यं लक्षणया च सूर्यपरं, न तु सूर्यायेति । वेदे तथाश्रुतेः कल्पने च मन्त्रत्वव्याहतेरित्यत्र सिद्धान्तः—"अतिदेशादेवोपपत्तेः" इति । अयमर्थः—यथा मन्त्रो ऽतिदेशप्राप्तः तथा मन्त्रगतसमवेतार्थत्वमपि प्राप्तं, तच्चोहं विना ऽनुपपन्नम् । तथा च यो मन्त्रः प्रकृतौ समवेतार्थकः स मन्त्रो विकृतौ यद्यसमवेतार्थकः, तदा समवेतार्थकपदप्रक्षेपः प्रयोज्य इति । ऊहश्चासमवेतार्थकपदत्यागपूर्वकसमवेतार्थपदसमभिव्याहारकरणम् । यस्तु प्रकृतावप्यसमवेतार्थकस्तस्य नोहः । यथा 'एतद्वः पितरो वास' इत्यस्य पार्वणप्रकृतावसमवेतार्थकत्वादेकोद्दिष्टेऽपि नोहः ।

ननु धान्यमसीति मन्त्रेऽपि तण्डुलपदोहोऽस्तु । नच तत्र लक्षणयैवोपपत्तिरिति वाच्यम् । "अग्नये त्वा जुष्टमित्यत्रापि तथात्वापत्तेरित्यत्र सिद्धान्तसूत्रम्-"न प्रकृतावूहो ऽपूर्वत्वात्" इति । अपूर्वत्वादुपदेशविधिप्राप्तत्वात् । अयमभावः-प्रकृतावूहे तत्र मुख्यपदं विहाय ऊह्यपदमेव वेदे प्रयुञ्जेत मुख्यपदस्य निष्प्रयोजनत्वात् । नन्वेवं "शब्दे ऽविप्रतिपत्तिः" इति कात्यायनसूत्रविरोधः । मुख्यशब्दप्रयोगे न कस्यापि विप्रतिपत्तिः-न

वैयर्थ्यमिति तदर्थत्वादिति, नैवम् । तत्सूत्रस्य प्रतिनिधित्वेन गृहीतपदार्थवाचकपदप्रयोगनिषेधार्थकत्वात् । यथा व्रीहिप्रतिनिधिशालिग्रहणे "व्रीहिर्यज्ञेषु कल्पताम्" इति मन्त्रे शालिपदोहाभावः । एतदपि मन्त्रे बोध्यम् । वाक्ये तु प्रतिनिधिरेवोह्यः । यथा मृताहप्रतिनिधावेकादश्यां श्राद्धे एकादशीत्वेन प्रयोगो न तु मृततिथित्वेनेति । अग्नये त्वा ऽजुष्टमिति । अग्निमुद्दिश्य त्वा—त्वाम्, अजुष्टम्—अयातयामं, प्रोक्षामीत्यर्थः ।

६१ अथ पाशाधिकरणम्—

दैक्षयागे श्रूयते "पाशेन पशुं बध्नाति, अथ प्रोक्षति, तिष्ठन्तं पशुं प्रयजति,ततः पाशं छिनत्ति, अदितिः पाशं प्रमुमोक्त्वेतम्, अदितिः पाशान् प्रमुमोक्त्वेनान्" इति । ततस्तद्विकृतियागे श्रूयते "पाशाभ्यां पशुं बध्नाति" इति । अत्रातिदेशागतौ पूर्वोक्तपाशच्छेदनमन्त्रौ । ततः प्रथममन्त्रे पाशमित्यत्रैकवचनस्थाने द्विवचनोहः कार्यः । द्वितीयमन्त्रे तु पाशानिति बहुवचनं प्रकृतावप्यसमवेतार्थकम्, अतस्तस्य विकृतियागेऽपि नोहः । अदृष्टार्थकत्वेन पाशानित्येव पाठ्यमिति सिद्धान्तः । वस्तुतस्तु पाशानिति संसारपाशकामक्रोधादिपरमिति । तिष्ठन्तमिति यागान्तरे पशुयातानन्तरं प्रयाजाचरणम् । अत्र तु पशौ जीवति । तथा च प्रयाजापकर्षे तदन्तकर्मकलापापकर्ष इति ।

६२ अथ कालशौचाधिकरणम्—

ननु शौचस्याङ्गत्वेन तदभावेऽपि नित्यानुष्ठानं कर्तव्यमेव । किञ्चिदङ्गहान्याऽपि तस्येष्टत्वात् । एवममावास्यायामतीतायामपि श्राद्धं कार्यममावास्याया अङ्गत्वादङ्गबाधेऽपि नित्यानुष्ठानादित्यत्र सिद्धान्तः-"पुरुषविशेषणत्वान्नैवम्" इति । अयमर्थः-'काले कुर्याच्छुचिः कुर्यात् ' इतिश्रुत्या शौ-

त्वमधिकारिविशेषणं तदभावेऽधिकाराभावान्न कर्माऽऽचरणम्। एवं विहितकालजीवनस्याधिकारिविशेषणत्वात्कालोऽप्यधिकारसम्पादक इति। एतन्यायमूलकमेव 'सन्ध्यां पञ्च महायज्ञान्' इत्यादिवचनमिति॥

६३ अथ हेतुमन्निगदाधिकरणम्—

हेतुमन्निगदः—सहेतुकं वचनम्। यथा "अग्निं यजेत्, स हि आशुनोपो, यथेष्टदाता" इति। अत्राऽऽशुनोपत्वादिकथनादाशुतोपत्वादिनाऽग्नेर्देवतात्वमन्यथा तद्वचनवैयर्थ्यादित्यत्र सिद्धान्तसूत्रम्—"प्ररोचनायोपपत्तेः" इति(१)। अयमाशयः—स हि आशुनोप इति हेतुमन्निगदः तस्य प्ररोचनार्थेनोपपत्तेः। प्ररोचना स्तुतिः। अग्नियागे झटिति प्रवृत्त्यर्थं हेतुमन्निगदोऽग्निं प्रस्तौतीति।

६४ अथाऽऽरुणान्यायः—

"अरुणयैकहायन्या गवा सोमं क्रीणाति" इत्यनन्तरं "वामसा क्रीणाति" इति श्रूयते। अत्र च विकल्पो युक्तः। गवा वामसा वा सोमक्रयः कार्य इति। अत्र सिद्धान्तः—"गुणत्वेनैककर्म्यसिद्धेः" इति(२)। पूर्ववचनेन प्राप्ते ऽरुणैकहायनगोकरणकसोमक्रये फलाधिक्याय वामोलक्षणगुणविधिरेवेति॥

६५ अथ सोमयाज्यन्यायः—

यागविशेषे श्रूयते "सोमेन दधिपयोभ्याञ्च यजेत" इति। अत्र सोमस्य दधिसहितपयसश्चोभयोरपि प्राधान्यं यद्यप्युचितं तथापि "असोमयाजी न सोमेन" इति श्रुत्या ऽकृतसोम-

(१) "अर्थस्तु विधिशेषत्वाद्यथा लोके" इति सूत्रं (अ० १ पा० २ अधि० ३ सू० २९) इति दृश्यते।

(२) "अर्थैकत्वे द्रव्यगुणयोरेककर्म्यान्नियमः स्यात्" इति सूत्रं (अ० ३ पा० १ अधि० ६ सू० १२) इति दृश्यते।

यागस्य सोमनिषेधात् न सोमस्य प्राधान्यमत्र, किन्तु दधिपयसोरेव। अत्र सिद्धान्तः-"**निमित्ताद्व्यतिरेके प्राधान्याविरोधात्**" इति। सोमयागाकरणनिमित्तात्सोमस्य व्यतिरेकेऽपि न प्राधान्यबाधः। तथा च सोमयाजिनां यागे उभयस्यैव प्राधान्यम्। असोमयाजिनां तु प्रधानीभूतस्य सोमस्य बाधः। नहि बाधेन तस्य प्राधान्यं दूरीक्रियते इति।

ननु सोमस्याङ्गत्वमस्तु, भैवम्। तर्हि तद्विकृतियागे ऽतिदेशात्सोममाप्तिः स्यात्। प्रधानत्वे तु तस्यातिदेशो न सम्भवति प्रधानातिदेशे तद्यागस्य प्रकृतयागत्वमेव स्यात् वैलक्षण्याभावात्। तथा चाङ्गानामेवातिदेशः। तेषामुपकारकत्वात् प्रधानस्य चोपकार्यत्वात् कथं यजेतेत्याकाङ्क्षायामतिदेशः। तथा च कथमित्यस्य केनाङ्गेनेत्यर्थत्वादङ्गानामेवातिदेश इति। अत एव दीक्षणीयादियागे "अप्रयाजास्ता" इति श्रूयते। तत्र आहुतयो ऽप्रयाजाः प्रयाजरहिताः कार्या इत्यप्राप्तप्रयाजनिषेधानुपपत्त्या दर्शधर्माणामतिदेशः कल्प्यते, नतु दर्शप्रधानीभूतानामाग्नेयादीनां त्रयाणामिति॥

६६ अथाक्ताधिकरणम्—

"अक्ताः सिता जुहुयात्" इति श्रूयते। तत्र केनाक्ता इत्याकाङ्क्षायामेतत्प्रकृतियागे 'दध्ना जुहोति' इति श्रुतेर्दध्नैवाक्ताः सिता इति प्राप्यते। अत्र सिद्धान्तः-"**वाक्यशेषे घृतस्तुतेः**" इति। अस्य यागप्रकरणस्योपसंहारे 'तेजो वै घृतम्" इति घृतस्तुत्यन्यथाऽनुपपत्त्या घृतेनैवाक्ता इति बोध्यते। नच व्याहृतिहोमाद्यर्था घृतस्तुतिः तस्य सर्वत्राऽऽज्यकरणत्वेन स्तुतेर्वैयर्थ्यात्॥

६७ अथाऽऽमिक्षाधिकरणम्—

"तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति, वाजिभ्यो वाजिनम्" इति श्रूयते । अत्युष्णदुग्धे ऽम्लदधियोगेन क्षीरभागः कठिनो भवति, नीरभागश्च भवति । तत्र क्षीरभाग आमिक्षा, सा विश्वेदेवदेवताका । नीरभागो वाजिनं तद्वाजिदेवताकम् । वाजं होमद्रव्यमामिक्षारूपमस्तीति वाजी इति योगार्थेन उपस्थिता विश्वेदेवा एव बोध्यन्ते । यथा 'बृहस्पतिर्विश्वेदेवैः' इत्यत्र विश्वशब्दस्य सर्वार्थतयोक्तसर्वदेवैरिति योगार्थाऽऽदरो नतु रूढ्या विश्वदेवगणग्रहणं, तथा ऽत्रापि ।

अन्ये तु योगाद्रूढेर्बलवत्त्वात् वाजिपदेन सूर्याश्वा एवोच्यन्ते । बृहस्पतिर्विश्वेदेवैरित्यत्र प्रकरणाद्योगार्थाऽऽदरः । नचात्र तथा । तथाच कर्मभेद एवेति वदन्ति ।

६८ अथाभ्युदितेष्टिन्यायः—

अभ्युदितेष्टिकालः सूर्योदयकालः । सच मुहूर्तात्मकः । यथा—

सन्धिर्दिनरजन्योश्च उदयास्तमयौ तथा ।
दिवारात्र्योस्तथार्द्धञ्च मुहूर्ताः समुदाहृताः ॥

तथा च मुहूर्तात्मके उदयसमये साङ्गेष्ट्यनिष्पत्तेः कथं तत्र प्रवृत्तिः । अत्र सिद्धान्तः—"कालस्यारम्भ एवोपयोगात्" इति । अयम्भावः—विहितकालजीवित्वेनाधिकारित्वात्कालो ऽधिकारसम्पादकः । तथा चाधिकारस्य आरम्भ एवोपयोगः । शुचित्ववत् । अन्यथा आरम्भानन्तरमशौचे कर्मवैगुण्यं स्यात् । 'आरब्धे सूतकं न स्यात्' इत्यपि वचनमेतन्न्यायमूलकमेव । तथा च—

काले खलु समारब्धमकाले ऽपि समापयेत् ' इति ।

केचित्तु प्रधाननिष्पत्तिपर्यन्तं कालापेक्षाऽस्येव, उत्तराङ्गे

त्वपेक्षा नास्ति कालस्याधिकारत्वे ऽप्यङ्गत्वात् । अङ्गत्वञ्च प्रधाननिष्पत्त्यैव चरितार्थमिति वदन्ति ।

६९ अथ हविरुपलक्षणाधिकरणम्—

"यस्य निरुप्तं हविश्चन्द्रमा अभ्युदियात, स त्रेधा तण्डुलान् विभजेत्, व्याहृतिभिर्जुहुयात्" इति दर्शयागे श्रूयते । "आग्नेयोऽष्टाकपालो भवत्यमावास्यायाम्" "ऐन्द्रं दधि" "ऐन्द्रं पयः" इत्यनेनामावास्यायां दध्यारम्भो विहितः । दध्नश्च अहसाध्यत्वात् यागो नाऽमावास्यायां, किन्तु तदुत्तरदिने । तत्र चापराह्णे द्वितीयावेधे सति न यागः, किन्तु पूर्वदिने एव । तथा च दध्यारम्भोऽपि यागपूर्वदिने । तथा च द्वितीयाविद्धप्रतिपदि यागकरणे प्रायश्चित्तार्थमाह—यस्य निरुप्तमिति । यस्य हविर्निरुप्तं पूर्वाह्णे यागो निष्पन्नः । अथ च दिवा द्वितीयावेधाधीनस्तद्दिने सायं चन्द्रोदयो भवति स महाव्याहृतिहोमरूपप्रायश्चित्ताय चर्वर्थं त्रेधा तण्डुलान् विभजेत् । अत्र च "देवतातो हविर्विभजेत्" इति चोपसंहारे श्रूयते । दर्शे या देवतोद्देश्या तस्या यद्धविस्तद्विभजेदित्यर्थः । तेन दधिपयसोरपि त्रेधा विभागः प्राप्तः । तथा च तण्डुलानिति पदं हविरुपलक्षणार्थमिति । तथा च कात्यायनः—

पर्वणयोश्चतुर्थीश्च आद्याः प्रतिपदस्त्रयः ।
यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः ॥

तेन यागपरदिने प्रायश्चित्तार्थं दधिपयस्तण्डुलान् समानीय प्रत्येकं त्रेधा कृत्वा व्याहृतिभिः प्रत्येकं जुहुयादिति ।

७० अथ प्राणाधिकरणम्—

"वैघसे वैघस्या जुहोति" इति श्रूयते । वैघस्या वेघःप्रका-

शिकया ऋवेत्यर्थः । वेधःशब्दवाच्यो विरिञ्चिर्विष्णुश्चेति । अत्र सन्देहे प्रवृत्त्यनुपपत्तिरित्यत्र सिद्धान्तः—प्राणशब्दवत्-ख्यातत्वात्" इति । अयमर्थः—उपासनाकाण्डे 'प्राणोऽस्मीति स्वं चिन्तयति' इति श्रुतिरस्ति । तत्र प्राणशब्दस्य प्रयोग इन्द्रे इन्द्रिये जीवे वायौ ब्रह्मणि च दृश्यते । यथा—

'इन्द्रेन्द्रियब्रह्मजीववायुषु प्राण इष्यते' इति ।

तत्र बहुप्रयोगो ब्रह्मणि । यथा "सोऽयं प्राणमयः" इति, "प्राणः सर्वं विभावयति" इति, "प्राणो ह्यानन्दमयः" इति । तथा च प्रयोगपाचुर्यात् प्राणोऽस्मीति ब्रह्मपरम् । तथा वेधःशब्दस्य विरिञ्चौ ख्यातत्वेन बहुप्रयोगाद्विरिञ्चिरेव वेधःशब्दार्थ इति ।

७१ अथ विविदिषदधिकरणम्—

"तमेवात्मानं ब्रह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन" इतिश्रुत्या आत्मज्ञानफलको ऽग्निहोत्रादिर्यज्ञः प्राप्तः । "यावज्जीवमग्निहोत्रं जुहोति" इतिश्रुत्या नित्यमपि तत्प्राप्तम् । तथा च विविदिषुभिर्गृहस्थैर्वारद्वयमेतत्कर्तव्यम्, मैवम् । ब्रह्मज्ञानार्थं तत्करणेनैव नित्यस्यापि निष्पत्तेः । नच नित्यानित्यवैषम्यम् । काम्यकरणेनैव नित्यस्यापि सिद्धिरिति प्रसङ्गन्याय एवात्र । यथा निमन्त्रितो ब्राह्मणो भुक्त्वा परकीयश्राद्धं, स्वतृप्तिञ्च निष्पादयतीति ।

गुरुमते तु काम्यापूर्वनित्यापूर्वयोरेकविधिबोध्यत्वासम्भवादावृत्तौ वाक्यभेदापत्तेर्नित्यस्य फलश्रुतिः स्तुतिरूपैव, नतु नित्यस्य सकामाधिकारित्वमिति ।

७२ अथ स्मृत्यधिकरणम्—

स्मृतेर्वेदमूलकत्वानुमानादेव निष्कम्पप्रवृत्तिजनकत्वम् ।

अन्यथा पौरुषेयत्वेन भ्रमादिमूलकत्वशङ्क्या तन्न स्यात् । तथाहि—इयं स्मृतिः स्वसमानार्थकवेदमूला, असम्भवन्मूलान्तरत्वे सति समूलत्वात्, प्रत्यक्षवेदमूलकस्मृतिवत् । एवञ्च वेदमूलकत्वानुमानादेवावच्छेदकतया वाक्यार्थसिद्धेः श्रुतेर्न प्रमाजनकत्वमिति सूत्रम्—"अकारणत्वादर्थस्य" इति । कार्येण स्मृत्या कारणस्य वेदस्यानुमाने ऽकारणत्वात् पदार्थस्यैव नानुमानविषयत्वं कुतो वाक्यार्थस्येति । अकारणस्य तद्विषयत्वे ऽतिप्रसङ्गात् ।

नचैवं कुतो विशिष्टप्रतीतिः ?, अर्थविषयकेण तटस्थपूर्वज्ञानेन भेदाग्रहाद्विशिष्टधीव्यवहारः । पाककृतौ मानसप्रत्यक्षायां पाकविशिष्टधीव्यवहारवत् । बहिर्विषयके मनसो ऽस्वातन्त्र्यात् । मीमांसकमते ज्ञानस्यापत्यासत्तित्वादिति ॥

७३ अथ ज्योतिरधिकरणम्—

"अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेनेन सहस्रदक्षिणेन यजेत" इति श्रूयते । तेन ज्योतिष्टोमयागस्य त्रैविध्यं नामत्रयविधानात् । 'गोशते दक्षिणा' इत्यनेन च दक्षिणा विहिता प्राक् । अनेन सहस्रदक्षिणाख्यो गुणो विधीयते । तथा चानेनेतिपदात् त्रयाणामप्युपस्थानात् त्रिष्वेव सहस्रदक्षिणागुण इत्यत्र सिद्धान्तः—"अथ पदेन च्छेदात्" इति(१) । अथैष सर्वज्योतिरित्यत्रास्थपदेन पूर्वोक्तव्यवच्छेदादनेनेतिपदेन सन्निहितसर्वज्योतिर्याग एवोक्तस्तत्रैव सहस्रदक्षिणेति ।

७४ अथ वैश्वानराधिकरणम्—

"वैश्वानरमुपास्ते विद्युदादित्यवाय्वाकाशोदकपृथिव्या

(१) संज्ञा चोत्पत्तिसंयोगात्" (अ० २ पा० २ अधि० ८ सू० २२) इति सूत्रं सूत्रपाठेऽस्ति ।

स्मकैः बहुभिरुपेतम् " इति । अत्र विद्युदादिरूपेण वैश्वानरस्य चिन्तनमुक्तम् । अत्र किं समुदायरूपेण चिन्तनं प्रत्येकं वा ?, इति संशये सिद्धान्तः—"साहित्यश्रुतेः" इति । बहुवचनेन साहित्यबोधनात् समुदायरूपेणैव चिन्तनमिति । यथाह भट्टः—"साहित्यं द्विवचनबहुवचनाभ्यां द्वन्द्वसमासाच्च"इति । ननु "आदित्येभ्यो जुहोतीत्यादित्यो वै देवता" इति श्रुत्या साहित्येन चतुर्थ्या देवतात्वबोधोऽस्तु, मैवम् । नोह देवतात्वे चतुर्थ्याः शक्तिः किन्तु चतुर्थ्या देवतायामनिराकर्तृकसम्प्रदानत्वान्यथाऽनुपपत्त्या तद् कल्पनीयं, तत्र च बाधकं देवता इति बहुत्वश्रुतिः । तथा च भाष्यम्—'बहुत्वस्य पृथग् निवेशितत्वात्' इति । अस्यार्थः—पृथक्पदं तृतीयान्तं परस्परभिन्नस्वाश्रयार्थकं तेन परस्परभिन्नस्वाश्रयैर्निवेशितत्वात् बुद्धावर्पितत्वात् । प्रकृत्यर्थतावच्छेदकविशिष्टयावत्स्वाश्रयनिरूप्यत्वादिति यावत् । तथा च देवता इति बहुवचनेन प्रत्येकं देवतात्वावगम इति । निराकर्तृकं "मा दद्या" इति निषेधवचनं तन्नास्ति यस्य सम्प्रदानस्य तदनिराकर्तृकमिति । अनिराकर्तृकसम्प्रदानस्यार्थः ॥

७५ अथ गुणविकृत्यधिकरणम्—

"एष एव विधिर्यत्र कुत्रचिद्धोमे" इत्यनेन कुशकण्डिकाकर्मातिदेशादग्निष्टोमे 'शरपर्यं बर्हिर्भवति' इत्यनेन किं विधातव्यमास्तरणार्थं कुशस्य प्राप्तत्वादित्यत्र सिद्धान्तः—"गुणविकृतिभावात्" इति । अयमर्थः—गुणस्य प्राप्तकुशस्य विकृतित्वं तत्कार्यकारित्वं शरस्य विधीयते । तथा च शरा आस्तरणीया नतु कुशाः । नचैवं "दध्ना जुहोति" इति स्थलेऽपि प्रकृतित्यागातिदेशप्राप्तचरुस्थाने दधिविधानं स्यादिति वाच्यम् । तत्र 'दध्नेन्द्रियकामस्य' इति श्रवणात् गुणफलत्वं, नतु गुणविकृति-

त्वम् । दध्नो गुणविकृतित्वे कदाचिदपि चरुस्तत्र न स्यादिति ॥

७६ अथ क्रमः—

यथाऽऽह भट्टः—

"श्रुत्यर्थपठनस्थानमुख्यप्रावृत्तिकाः क्रमाः" इति ।

तत्र श्रौतक्रमो यथा—"त्रिवृता यूपं परिवीय आग्नेयं सवनीयं पशुमुपाकरोति" इत्यत्र क्त्वाश्रुत्या आनन्तर्यं बोध्यते । त्रिवृता—त्रिगुणात्मककुशमेखलया परिवीय—परिवेष्ट्य सवनीयं—सोमाङ्गकम् उपाकरोति—आलभते इत्यर्थः ।

अत्र केचित्—क्त्वाप्रत्ययेन परिव्यानस्याङ्गत्वं बोध्यते । तेन पशूपाकरणस्याङ्गं परिव्यानमिति वदन्ति, तन्न । उभयोरपि मुख्ययागाङ्गतया "गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्स्यात् (अ० ३ पा० १ अधि० १२ सू० २२) इति न्यायात् । अत एवाग्नीषोमीययागे "यूपं परिवीयाग्नीषोमीयं पशुमुपाकरोति, ततः सवनीयम्" इत्यभिधाय तद्विकृतियागे उक्तं "नात्राग्नीषोमीयमालभते, आश्विनग्रहं गृह्णाति" इति । तेनात्र यूपपरिव्यानानन्तरमाश्विनग्रहग्रहणं, ततः सवनीयपशूपाकरणम् । यदि परिव्यानं सवनीयपशूपाकरणाङ्गं स्यात्तदा मध्ये आश्विनग्रहग्रहणं नोच्येत इति ।

यथा वा "दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत" इति ।

अर्थक्रमो यथा—"अग्निहोत्रं जुहोति" "यवागूं पचति" इति । अत्र पाठक्रमादग्निहोत्रस्य पारिभाषिकस्याऽऽदावनुष्ठाने यवागूपाकस्य निरर्थकत्वं स्यात् । तथा च कथं जुहोतीत्याकाङ्क्षायां यवागूपाकोपदेशः । तेनाऽऽदौ यवागूपाकः कार्यः । ततस्तया होमः । अर्थो युक्तिस्तेन क्रमो ऽर्थक्रमः । इदमग्निहोत्रं कर्मान्तरं पृषदेवताकम्, अग्निहोत्रकर्मपाप्त्यर्थं तत्प्रयोगः । यवागुस्तु

पिष्टचरुरिति ।

पाठक्रमो यथा—"इन्द्राय जुहोति", "अग्नये जुहोति" इत्यादौ । यथा वा मातृपूजानन्तरं वसुधासदानम् । यथा च स्नानतर्पणयोर्मध्ये सन्ध्यावन्दनपाठात् मध्ये एव तदाचरणमिति ।

स्थानक्रमो यथा—एकोद्दिष्टे पार्वणधर्मातिदेशात् कुशासनाद्यनुष्ठानं कर्तव्यम् । तत्र पार्वणे यस्मिन् स्थाने यत् क्रियते एकोद्दिष्टेऽपि तथा । तेन नाऽनध्यवसायः केन क्रमेण कर्तव्यमिति । स्थानपदेनाऽऽदिमध्यावसानमुच्यते ।

मुख्यक्रमो यथा—ग्रहयागे ऽधिदैवतप्रत्यधिदैवतपूजनं केन क्रमेण कार्यमित्याकाङ्क्षायां मुख्यपूजनानन्तरमेव कर्तव्यमुत्पत्तिविधौ मुख्यस्य प्रथमोपस्थितत्वादिति ।

प्रावृत्तिकक्रमो यथा—वाजपेये "सप्तदश प्राजापत्यान् पशूनर्नक्ति, आलभेत" इति श्रूयते । तत्र च सप्तदशानामञ्जने इच्छया क्रमो, ऽभ्यञ्जनन्तु अञ्जनप्रवृत्तिक्रमेण कर्तव्यमेवमालम्भनञ्चेति । एवं श्राद्धे पितृपितामहादिपात्रक्रमेण संसव्यग्रहणं पितृपात्रे कर्तव्यम् । एवं बलिच्छेदनमुत्सर्गक्रमेणेति ॥

७७ अथ (१) श्रुतिलिङ्गादिन्यायः-

यथाऽऽह-जैमिनिः "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" (अ० ३ पा० ३ अधि० ७ सू० १४) इति । श्रुत्यादिन्यायानामेकविषये प्रसक्तावुत्तरोत्तरन्यायस्य दौर्बल्यं पूर्वमपेक्ष्योत्तरस्य विलम्बेनार्थोपस्थापकत्वादित्यर्थः । एषां लक्षणमुक्तं भाष्ये । यथा-

---

(१) क्वचित् समवाये विरोधन्याय इति पाठः ।

श्रुतिर्द्वितीया, (१)क्षमता च लिङ्गं,
वाक्यं पदान्येव तु संहतानि ।
सा प्रक्रिया या कथमित्यपेक्षा,
स्थानं क्रमो, योगबलं समाख्या ॥ १ ॥

कारकविभक्त्यात्मकद्वितीया(२)श्रुतिः, तया कर्मगतं क्रियाफलाश्रयत्वं बोध्यते । तत्र क्रिया (गमनादिः) शेषः साधनत्वात् (ग्रामप्राप्तेरित्यर्थः) । क्रियाफलाश्रयः शेषी साध्यत्वात् । तथा च शेषशेषिबोधकत्वाद् द्वितीयाया बलवत्त्वम् । मासंमधीते इत्यादिवारणाय कारकविभक्तीति(३) । उपपदविभक्तीनान्त्वन्तर्भावितपदसापेक्षत्वाद् विलम्बितत्वम् । वेदान्तटीकायां वाचस्पतिमिश्रास्तु कारकविभक्तिमात्रं श्रुतिः, सर्वासामेव विभक्तीनां प्रकृत्यर्थस्त्वार्थबोधे Sन्यनिरपेक्षत्वाद् बलवत्त्वमिति वदन्ति ।

लिङ्ग्यते ज्ञाप्यते Sनेनेति लिङ्गं मन्त्रः । बोधकपदघटितमन्त्रस्यार्थप्रकाशनसामर्थ्यं लिङ्गत्वम् । यथा—बर्हिर्देवसदनं दामि" इत्यस्य मन्त्रस्य 'दाप् लवने' इतिधातोर्दामीति सिद्धत्वाद्बर्हिश्छेदनप्रकाशकत्वेन तत्रैव विनियोगः । वाक्यं परस्परसाकाङ्क्षपदकदम्बः । प्रकरणन्तूत्पत्तिविधिना प्रधानबोधानन्तरं केन प्रकारेण कर्तव्यमित्याकाङ्क्षाऽङ्गाभिधानमयोजिका । स्थानं क्रमः, स च तत्सान्निध्ये पठितत्वम् । समाख्या योगार्थेन प्रवृत्तं पदम् ।

यथाऽऽह भट्टः—

---

(१) शब्दसामर्थ्यमित्यर्थः ।

(२) यथा "व्रीहीनवहन्ति" इत्यत्र द्वितीयाश्रवणमात्रेण व्रीहीणामवहननक्रियायां विनियोगो Sवगम्यते ।

(३) "कालाध्वनोरत्यन्तसंयोगे" इति सूत्रविहितद्वितीयाया उपपदविभक्तित्वात् ।

अभिधातुं पदे ऽन्यस्मिन्ननपेक्षो रवः श्रुतिः ।
सर्वत्रावगता शक्तिर्लिङ्गमित्यभिधीयते ॥
संहत्याऽर्थं ब्रुवन्वृन्दं पदानां वाक्यमिष्यते ।
प्रधानवाक्यस्याङ्गोक्त्या ऽऽकाङ्क्षा प्रकरणं मतम् ॥
स्थानं समानदेशत्वं समाख्या यौगिको वरः ।

इति श्रुत्यादिलक्षणोक्तं मीमांसापारदर्शिभिरिति । वरः-शब्दः सर्वत्राभिधीयते इत्यन्वयः । समानदेशत्वं—सान्निध्यम् ।

तत्र श्रुतिर्यथा—"ऐन्द्रया गार्हपत्यमुपतिष्ठते" इति द्वितीयया गार्हपत्याग्निगतं क्रियाजन्यप्रीतिफलाश्रयत्वं साक्षाद् बोधितमतथा च तस्य देवतात्वं श्रुतिप्राप्तम् । ऐन्द्र्येति इन्द्रप्रकाशिकाया ऋचः करणत्वं बोधितम् । तथा च विरोधः । नह्यन्योपस्थापकमन्त्रेणा-न्यस्योपस्थानं विहितं, तेनैकलक्षणा ऽऽवश्यकी । तत्र च गा-र्हपत्यपदे नेन्द्रलक्षणा । तद्देवतात्वस्य श्रौतत्वात् । लिङ्गेन तु देवतात्वं विलम्बबोध्यम्—इदमुपस्थानमिन्द्रदेवताकमिन्द्रप्रका-शकमन्त्रकरणत्वात्, ततः श्रुतिकल्पनम् 'ऐन्द्र्या इन्द्रमुपतिष्ठते' इतीत्यनुमानाधीनत्वात् । अत इन्द्रपद एव गार्हपत्यलक्षणा।स च मन्त्रः 'कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे' इति । एवं "पा-यसेन दध्ना जुहोति" इति श्रुतिः । पायसेन—पयः प्रकाशकेन मन्त्रेण, पयः पृथिव्यामित्यादिना । तथा च दधिनिष्ठं करण-त्वं श्रौतं, पयोनिष्ठञ्च लिङ्गादनुमेयमिति लिङ्गं दुर्बलमिति ।

लिङ्गस्य वाक्याद्बलवत्त्वं यथा—"पुरोडाशं श्रपयेत्" इत्यनन्तरमङ्गाकाङ्क्षायां "स्योनं ते सदनं कृणोमि, घृतस्य धा-रया सुपेवं कल्पयामि । तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मे-धं(१) सुमनस्यमान"इति श्रूयते । अत्र कल्पयामीत्यनेन पूर्वार्धेन

(१) सारभूतेत्यर्थः ।

पुरोडाशसदनकरणस्य प्रकाशः । उत्तरांशेन सादनस्य प्रकाशनम् । तथा च मन्त्रलिङ्गताद्वयप्रकाशः । एवं तस्मिन्निति श्रुत्या यदिति पदं कल्प्यम् । यत्सदनं कल्पयामि, तस्मिन् सीदेत्येकवाक्यतया एक एव मन्त्रः सादनमात्रे वाक्येन विनियुज्यते इति लिङ्गवाक्ययोर्विरोध, इति चेन्न । लिङ्गस्य वाक्यतो बलवत्त्वात् । तथाहि यत्पदं श्रुतं नास्ति, किन्तु तत्कल्पयित्वा एकवाक्यतया लिङ्गं कल्पनीयम् । तत्कल्पने तु प्रमाणाभावः । तद्विना च एकवाक्यता नास्त्येकार्थप्रतिपादकत्वाभावात्, सदनसादनयोः प्रतिपादकत्वात् । अत एव सूत्रम्—"अर्थैक्यादेकं वाक्यं साकाङ्क्षं चेद्विभागः" इति । शीघ्रोपस्थापकं लिङ्गम्" इति च ।

वाक्यप्रकरणयोर्विरोधो यथा—ज्योतिष्टोमप्रकरणे श्रूयते "तिस्रः साम्नाय्यस्योपसदो द्वादशाहीनस्य" इति । अत्र च उपसत्—सतिलव्रीहिचरुः । साम्नायो—ज्योतिष्टोमविशेषः । अत्र च ज्योतिष्टोमप्रकरणीयत्वेनाहीनपदं 'न हीनम्' इतियोगार्थेन साम्नाय्यपरम् । न च तत्रोपसत्त्रयविधिरस्त्येवेति वाच्यम् । एकवाक्यतया पञ्चदशोपसद्विधानात् । एवं वाक्येन चाहीनपदस्य रूढ्या ज्योतिष्टोमविकृतेरहीनाख्ययागस्योपस्थितिः तत्रैव द्वादशोपसदः, इति विरोधे सिद्धान्तः—योगाद्रूढेर्बलवत्त्वेन रूढपदघटितवाक्याच्छीघ्रं यागविशेषस्योपसदङ्गत्वप्राप्तिः, नतु प्रकरणानुरोधात् योगार्थस्याऽऽदरः । अहीनविषये प्रकरणस्य 'ज्योतिष्टोमः कथम्' इत्याकाङ्क्षाकल्पनाधीनप्रवृत्तिकत्वेन विलम्बितत्वादिति । अन्यप्रकरणमध्येऽपि प्रसङ्गादन्यनिरूपणं क्रियते इति ग्रन्थरीतिः । यथा छन्दोगपरिशिष्टे आभ्युदयिकप्रकरणे प्रसङ्गात्कतिचित्पार्वणधर्मा उक्ता इति । यथा वा दर्शप्रकरणे

ब्राह्मणावगोरणादेर्दोषमुक्त्वाऽऽह—श्रुतिः—'तस्माद् ब्राह्मणो नावगोरयितव्यो नापि ताड्य' इत्यादि । अत्र प्रकरणाद् ब्राह्मणानवगोरणं तदहननादि च श्रुत्या दर्शाङ्गतया बोधितम् । तथा चान्यत्र न नियम इति, तन्न । वाक्यात्प्रकरणस्य दुर्बलत्वात् । तथा च सर्वदैव निषेधः । नच तत्प्रकरणपाठः किमर्थ इति वाच्यम् । प्रसङ्गसङ्गत्या तत्पाठात् ॥

प्रकरणस्थानयोर्विरोधो यथा—

राजसूये सर्वे एव इष्टिपशुयागा अङ्गत्वं प्राप्ताः । तत्राभिषेचनीयाख्यस्य सोमयागविशेषस्य सन्निधौ श्रूयते "अक्षैर्दीव्यति, राजन्यं जिनाति, शौनःशेफं शृणोति" इति । शौनःशेफं—शुनःशेफमुनेश्चरितं पुराणोक्तम् । अत्र चाक्षदेवनादि अभिषेचनीयस्थाने श्रवणात् तस्यैवाङ्गं ?, किंवा प्रकरणाद्राजसूयस्याङ्गमिति ?। नचोभयथापि राजसूये तेषां कर्तव्यत्वाद्विचारो ऽयमनुपयुक्त इति वाच्यम् । देवनादीनामभिषेचनीयाङ्गत्वे यत्र प्रधानीभूतो ऽभिषेचनीययागः स्वतन्त्रस्तत्रापि तेषामनुष्ठानापत्तेः । अत्रोच्यते । कथं राजसूयः कर्तव्य इत्याकाङ्क्षायाः प्रवृत्तत्वात् तेषां राजसूयाङ्गत्वम् । अभिषेचनीयसन्निधिपाठस्तु तदानन्तर्यकरणार्थमात्रमिति ।

स्थानसमाख्ययोर्विरोधो यथा—

बहून्मन्त्रानुक्त्वा "एतत्पौराडाशिकम्" इति पठितम् । तन्मन्त्रगणमध्ये 'शुन्धध्वं दैव्याय कर्मणे' इति पठितम् । तथा च साम्नाय्ययागे श्रूयते "साम्नाय्याय ग्रहान् गृह्णाति, शुन्धध्वं दैव्याय कर्मणे, साम्नायेन जुहोति, पुरोडाशग्रहान् गृह्णाति" इति। अत्र च मन्त्रलिङ्गाच्छुन्धध्वमिति मन्त्रः पात्रशोधने विनियुक्तः। सच साम्नाय्यसन्निधौ श्रुतः । तथा च सान्निध्यरूपस्थानबला-

त्साम्नायपात्रशोधने उपयुक्तः ।

अथ पौराडाशिकमन्त्रगणमध्यपाठाद्योगार्थबलेन पुरोडाश-पात्रक्षालने विनियुक्तः । पुरोडाशस्येदं पौराडाशं पात्रम् । तत्स-म्बन्धित्वान्मन्त्रः पौराडाशिक इति योगार्थः । अत्र सिद्धान्तः । सान्निध्यं बलवद् यदा पौराडाशिकपदस्यान्यत्रोपस्थितस्यानुसन्धानं तदा योगार्थस्योपस्थितिस्तत्पूर्वमेव सान्निध्यात्साम्नाय्यपात्रे ऽन्व-यादिति । नच पुरोडाशपात्रक्षालनमावश्यकं तत् केन मन्त्रेणेति वाच्यम् । पौराडाशिकमन्त्रगणपठितान्यमन्त्रेण तत्कर्तव्यत्वा-त् । नचैवं शुन्धध्वमिति मन्त्रस्य पौरोडाशिकमन्त्रमध्यपाठो नोचित इति वाच्यम् । यागान्तरे तस्य पुरोडाशपात्रेषूपयु-क्तत्वात् । साम्नाय्यं (१)हविर्विशेषः । ग्रहः पात्रं, गृह्यते ऽनेति व्युत्पत्त्या ।

समाख्योदाहरणं यथा—"हौत्रमाचरति, औद्गात्र-माचरति" अत्र होतुरिदमिति योगार्थेन हौत्रं होमः । औद्गात्रं गानम् । अत्र बाधकाभावाद्यौगिक एवार्थो ग्राह्य इति । तदुक्तं—

बाधिकैव श्रुतिर्नित्यं समाख्या बाध्यते सदा ।
मध्यमानन्तु बाध्यत्वं बाधकत्वमपेक्षयेति ॥

७८ अथ विधिनियमादिः-

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥ १ ॥

यद्यपि कार्यत्वप्रमापकः प्रत्ययो विधिः । सच लिङादिः । कार्यादिपदवारणाय प्रत्यय इति । तथापि प्रकृतेऽज्ञातार्थप्रमापको

---

(१) दधिपयोरूपम् ।

वैदिकः शब्दो विधिः । अनुवादकस्य गृहीतग्राहकत्वेनाप्रमापकत्वात् । नच तस्य भ्रमजनकत्वं वाच्यम् । प्रमाभ्रमविलक्षणज्ञानजनकत्वात् । स्मृतिवत् निर्विकल्पकवच्च तन्मते तदुभयविलक्षणज्ञानमस्तीति । नियम आवश्यकत्वम् । अयोगव्यवच्छेद इति यावत् । परिसंख्या ऽन्ययोगव्यवच्छेदः । अत्यन्तमप्राप्तौविति प्राप्तिसामान्याभावार्थम् । तथा च वेदान्तराद्, अतिदेशाद्, अर्थतो, रागाच्चाप्राप्तावित्यर्थः ।

आद्ये यथा—"सोष्णीषा ऋत्विजः प्रचरन्ति" इत्यनेन पूर्वमुष्णीषस्य विहितत्वात् "लोहितोष्णीषा ऋत्विज" इत्यनेनाधिकफलार्थं प्राप्ते उष्णीषे लौहित्यमात्रं विधीयते। अन्यांशोऽनुवादः ।

आतिदेशाद्यथा—"एष एव विधिर्यत्र क्वचन होमे" इत्यनेन कुशकण्डिकातिदेशात्पर्युक्षणस्यापि प्राप्तौ वैश्वदेवहोमे "पर्युक्षणस्वाहाकारैर्जुहुयात्" इत्यनेन पर्युक्षणोत्तरसकलकुशकण्डिकाधर्मो निषिध्यते। "आघारमाघारयति" इत्यनेनापि कुशकण्डिकाधर्मत्वेनाऽऽघारस्य प्राप्तत्वादाज्यभागनिवृत्तिर्विधीयते । यथा वा पार्वणधर्मातिदेशात्सापिण्डने विश्वेदेवप्राप्तौ—

सपिण्डनं तथा श्राद्धं दैवपूर्वं नियोजयेत् ।

इति काण्डानुसमयो विधीयते । अनुसमयः अमिश्रणम् । देवकाण्डं समाप्य पितृकाण्डं कर्तव्यमिति ।

अर्थतो यथा—एकोद्दिष्टेऽर्थैक्येन पवित्रैक्यस्यार्थतः प्राप्त्या एकं पवित्रमित्यनेन दलैक्यं विधीयते ।

रागाद्यथा—ऋतौ भार्यामुपेयात् इत्यत्र नियमो विधीयते उपेयादेवेति । तथा "पञ्च (१)पञ्चनखा भक्ष्या"इत्यत्र परिसंख्या

१ "शशकः शल्यकं गोधा कुर्मो खड्गश्च पञ्चमः" इति स्मृत्युक्ता बोध्याः ।

विधीयते । पञ्चनखेतरेऽभक्ष्या इति । तथा च कुत्र नियमः कुत्र परिसंख्या रागप्राप्तत्वाविशेषादत आह—नियमः पाक्षिके सतीति । अयं भावः—रागतो—यथा तस्य(१) प्राप्तिः, तथा तदभावस्यापि प्राप्तिरिति पाक्षिको ऽभावः, अयोग इति यावत् । तस्मिन्नयोगे सति अप्रशस्तिनियमः—अयोगस्य व्यवच्छेदः । अप्राशस्त्यञ्च पापजनकत्वे कर्मवैगुण्यञ्च यथासम्भवं बोध्यम् । तत्र चेति । तत्र—अप्रशस्ते । अन्यत्र—प्रशस्ते । तथा च अप्रशस्तान्यविषयकप्राप्तौ परिसंख्या ।

अन्ययोगव्यवच्छेदो यथा—पञ्चनखेतरभक्षणस्याप्रशस्तत्वात्तद्व्यवच्छेदः । तथा च नियमे ऽयोगो दोषः । अतस्तद्भावो विधीयते । परिसंख्यास्थले ऽन्ययोगो दोषः । अतस्तद्भावो विधीयते इति । तेन नियमे लक्षणया तदभावनिवृत्तिः । तथा च स्वार्थहानिः, परार्थकल्पनेति दूषणद्वयम् । परिसंख्यायान्तु स्वार्थहानिः, परार्थकल्पना, रागप्राप्तपञ्चनखेतरभक्षणबाधश्चेति दोषत्रयमिति ॥

मिश्रास्तु—पाक्षिकत्वं—समुच्चयाभावः । ऋतुकालतदन्यकालयोरुपगमे समुच्चयाभावात् नियमः । पञ्चनखतदन्ययोर्भक्षणे समुच्चयसम्भवात्परिसंख्या । अत एव शेषतदन्ययोर्भक्षणे समुच्चयसम्भवात् "शेषम्भुञ्जीत" इत्यत्र परिसंख्येति, वदन्ति । तच्चिन्त्यम् । "स्वदारनिरतः सदा" "शयनं मध्ययामयोः" इत्यादौ समुच्चयासम्भवेन परिसंख्या न स्यादिति ।

विधिश्चतुर्विधः—उत्पत्तिविधिरधिकारविधिरङ्गविधिः प्रयोगविधिश्चेति । तत्र प्रधानस्वरूपविधिरुत्पत्तिविधिः । यथा—

---

(१) भार्यागमनस्य ।

"अमावास्यायां पितृभ्यो दद्यात्" इति । उत्पत्तिविधेश्च विध्यन्तरापेक्षया बलवत्त्वं निरपेक्षत्वात् ।

द्वितीयो यथा—

"सपिण्डीकरणादूर्ध्वं दर्शश्राद्धादि चेष्यते" इति ।

अनेन कृतसपिण्डीकरणपितृकस्यममावास्याश्राद्धेऽधिकार इति बोध्यते ।

अङ्गविधिर्यथा—प्रधानमुक्त्वा तत्कथमित्याकाङ्क्षायां प्रवृत्तः। यथा—दर्शमुक्त्वा "इडो यजति" "समिधो यजति" "तनूनपातं यजति" "स्वाहाकारं यजति" "बर्हिर्यजति" "हविर्यजति" इति प्रयाजाद्यङ्गषट्कविधिः ।

प्रयोगविधिस्तु कल्प्यः । यथा—अयमधिकारी एभिरङ्गैः कुर्यादिति विशिष्टविधिः । तथा उत्पत्तिविधिरपि द्विविधः—श्रूयमाणः, कल्प्यश्च । आद्यः प्रसिद्ध एव । कल्प्यो यथा—रात्रिसत्रेऽर्थवादाद्विधिकल्पनम्—"प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति" इत्यनेन प्रतिष्ठाकामो रात्रिसत्रं कुर्यादिति कल्प्यते ।

क्वचिदनुवादाद्विधिकल्पनम् । यथा-"चरुं श्रपयति, चतुरवत्तं जुहोति"इति। अनेन चरुहोममनूद्य चरुश्रपणं चतुरवदानं च विधीयतेतेन"चरुहोमं कुर्यात्"इत्यादावेव विधिः कल्प्यते।अवदानं तु जुह्वादौ घृतपूर्णेन स्रुवेण घृतनिधानं, ततश्च तदुपरि चरुः स्थाप्यते, तदुपरि पुनस्तादृशघृतदानमित्युच्यते इति । एवमतिदेशोऽपि क्वचित्कल्प्यः । यथा दीक्षणीयादियागानुक्त्वा "अप्रयाजास्ता" इति श्रूयते । ता आहुतयः प्रयाजरहिताः कार्या इत्यर्थः । तथा च प्रयाजाप्राप्तौ तन्निषेधासम्भवादर्शधर्मातिदेशः कल्प्यः ।

७९ अथ श्रुतशब्दात्यागः-

यथा "तद्विष्णोरिति केशवं यजते" इति श्रूयते। अत्र केशववाचकनाम्नां बहूनां सत्त्वात्केन नाम्ना उल्लेख इत्यत्र सिद्धान्तः- 'यथाश्रुतविहारेण वक्तव्यम्' इति । विहारो व्याहारः। तत्राप्युत्पत्तिवाक्यस्य बलवत्त्वात्केशवेत्युल्लेख्यम्, नतु मन्त्रस्थविष्णुरिति। यत्र विधौ नाम नास्ति तत्र लिङ्गस्थं ग्राह्यम्। यथा दामोदराय नभसीति । ननु—

शिवाय पञ्चक्षेपेण शिवलोके महीयते।

इत्यत्र क्षेपशब्दो लक्षणया दानपरः। तथाच तत्समकल्पवाक्ये पूर्ववत क्षेपशब्दप्रयोगः स्यात्। मैवम्। स्वायत्ते वाक्ये लक्षणाव्याहारयोरनुचितत्वात्। अध्याहारेऽपि वाक्यभेद एव श्रुतवाक्यजन्यशाब्दबोधविषयादधिकविषयकबोधजनकत्वादिति।

८० अथ विध्यनुवादवैषम्यम्—

एकविषये वाक्यस्य विधित्वानुवादत्वयोर्विरोध इत्यर्थः। यथा—"वासन्तसितपक्षं वन्ह्यादीन् यजेत, पौर्णमास्यां पौर्णमासेन" इति श्रूयते। तत्र च पौर्णमासेनेत्यंशेऽनुवादत्वं "दर्शपौर्णमासाभ्यां यजेत" इत्यनेन तस्य प्राप्तत्वेन तदंशे विधित्वासम्भवात्। नच तां विहायैव चतुर्दशतिथिषु विधिरस्तु। पक्षमित्यत्यन्तसंयोगे द्वितीयाश्रुतिविरोधात्। तथा चायं पौर्णमासोऽन्य एव विधेयः। पौर्णमासेनेति तद्विधिप्राप्त्यर्थं तत्संज्ञा। यथा इष्टिसंज्ञा अतिदेशप्राप्तेष्टिधर्मकत्वात् पशुयागविशेषस्य। तथा चाऽऽरब्धपक्षयागेन पौर्णमास्यां पौर्णमासद्वयमेव कार्यम्। काम्ययोस्तन्त्रत्वाभावात्। अत एवापरपक्षनिमित्तकममावास्यायां श्राद्धान्तरमेव विधीयते। तत्र तु सामान्यामावास्याश्राद्ध-

तदभावास्याश्राद्धयोस्तन्त्रेणैव निर्वाहो नित्यत्वात् ।

८१ अथ नित्यानित्यवैषम्यम्—

यस्य कर्मणो नित्यविधिविषयत्वं तस्य काम्यविधिविषयत्वं नास्ति । एतच्च गुरुमते बोध्यम् । नित्यापूर्वकाम्यापूर्वयोरेकविधिबोध्यत्वासम्भवात् । यथा—

'यस्तु पूजयते नित्यं लिङ्गं त्रैभुवनेश्वरम् ।
स स्वर्गवासमोक्षाणां क्षिप्रं भवति भाजनम्' ॥

इति नित्यशिवपूजनस्य स्तुतिमात्रम् ।

यद्वा विधिकल्पनद्वारा कर्मान्तरमेवानेनार्थवादेन बोध्यते । तथा च काम्येन नित्यस्यापि प्रसङ्गेन सिद्धिर्न तु कर्मैक्यमिति ।

८२ अथ सापेक्षत्वनिरपेक्षत्ववैषम्यम्—

" आदित्यपरिवेशे आदित्याय यजेत " इति श्रूयते । तत्र न पूर्वाण्हनियमः आदित्यपरिवेशसमयकर्तव्यत्वादित्यत्र सिद्धान्तः—"बाधसापेक्षत्वापत्तेः " इति । तथा हि—सामान्यप्राप्तपूर्वाण्हबाधं कृत्वा ऽस्य मध्याह्नादौ प्रवृत्तिः । पूर्वाण्हसमये परिवेशे तु बाधनिरपेक्षेति एकविधेरुभयविधत्वं न सम्भवति । तेनास्य यागस्य पूर्वाण्हमात्रपरिवेशे कर्तव्यत्वम् न तु मध्याह्नादौ, निरपेक्षप्रवृत्तेः । यस्य बाधसापेक्षा प्रवृत्तिः । स विधिः कदाचिदपि न निरपेक्ष इति । न चोपरागस्यापराण्हबाधकत्वात्तत्राप्येतादृशं स्यादिति वाच्यम् । सूर्योपरागस्यापराण्हविषयकत्वसम्भवेऽपि चन्द्रोपरागस्य निरवकाशत्वापत्त्या अपराण्हविधेरेवोपरागातिरिक्तविषयत्वं कल्प्यत इति । वस्तुतो 'निशि काम्यव्रतेषु च' इतिवचने (१)पदाहवनीयवद्विरोधापत्त्या

(१) एतद्ग्रन्थस्थ(२३)त्रयोविंशाधिकरणवदित्यर्थः ।

निश्यपीत्यर्थः । तथा दिवा भागान्तरे मध्याह्नादौ (१)दण्डापूपवत्सिद्धिरिति ॥

८३ अथ द्वयोः प्रणयन्तीत्यधिकरणम्-

यथा धातुयागे "तपस्तपस्यौ शैशिरेण, मधुमाधवौ वासन्तेन, शुक्रशुची ग्रैष्मेण, नभोनभस्यौ वार्षिकेण, इषोर्जौ शारदेन, सहःसहस्यौ हैमन्तेन यजेते" । "चतुर्षु पर्वसु वेदिं कुर्वन्ति" । "शारदे तु द्वयोः प्रणयन्ति, उपात्र वपन्ति" । "न वैश्वदेवे उत्तरवेदिमुपकिरन्ति, न शुनासीर्ये" इति शतपथश्रुतिः(२)। अस्यार्थः—तपस्तपस्यौ माघफाल्गुनौ व्याप्य शैशिरनाम्ना यागेन यजेते । एवमुत्तरत्रापि व्याख्येयम् । धातौ च पौर्णमासीद्वयममावास्याद्वयं च वर्तते । तदेव पर्वचतुष्टयम् । तेषु द्रव्यासादनाय वेदिं कुर्वन्ति । तेन नैतेषु पर्वसु दर्भे द्रव्यासादनम् । शारदधातुयागे तु द्वयोः पर्वणोरेव वेदिं प्रणयन्ति—कुर्वन्ति । पर्वनामान्याह— कर्कभाष्ये ।

आग्नेयं प्रथमं प्रोक्तं वैश्वदेवं द्वितीयकम् ।
बार्हस्पत्यं तृतीयन्तु शुनासीर्यं तुरीयकम् ॥ १ ॥
आद्ययोः पूर्ववेदिः स्यादुत्तरावेदिरन्त्ययोः ।
यागोपयुक्तवस्तूनि स्थापयेत्तत्र याज्ञिक इति ॥ २ ॥

प्रथमं पर्व पौर्णमासी । द्वितीयममावास्या । तृतीयञ्च पौर्णमासी । चतुर्थममावास्येति । शुनासीर इन्द्रस्तत्सम्बन्धि शुनासीर्यम् । आद्यपर्वद्वये वेदिः पूर्ववेदिसंज्ञिका । अन्त्ययोरुत्तरवेद्या-

(१) अत्रत्य(४२)द्विचत्वारिंशाधिकरणन्यायेनेति भावः।
(२) उक्तानुपूर्वीका श्रुतिः शतपथब्राह्मणे नोपलभ्यते । संहितायां तु 'तपश्च तपस्यश्च शैशिरावृतू' इत्याद्यानुपूर्वीका दृश्यते इति बोध्यम् ।

ख्या । वेदिषु किं करणीयं तत्राऽऽह-उपात्र वपन्तीति । अत्र-आसु वेदिषु उपवपन्ति-उपरि द्रव्याणि स्थापयन्ति । शारदे द्वयोरित्युक्तं तत्कयोर्द्वयोरित्याह-न वैश्वदेवे उत्तरवेदिमुपकिरन्ति-कुर्वन्ति । एवं शुनासीर्ये ऽपीति । तेन शारदे पूर्ववेदिद्वयकरणमेव उत्तरवेद्योर्निषिद्धत्वात् । अत्र च शारदेऽपि वेदिचतुष्टयस्य प्राप्त्योत्तरवेदिनिषेधः सङ्कुचते । तथा चोत्तरवेद्यंशे प्रापकस्य विधेर्बाधं विना न निषेधविधिर्भवतीति, सर्वदैव बाधसापेक्षोऽयं निषेधविधिर्न कदाऽपि बाधनिरपेक्षः । यस्तु निरपेक्षः स कदाऽपि न तत्सापेक्ष इति ।

श्राद्धविवेके तु पर्युदासविधिरयमुक्तः । वैश्वदेवशुनासीर्यभिन्नपर्वणि वेदिं कुर्वन्तीत्यर्थः । तथा 'वेदाविदं पिनाष्टि' इति परिभाषया सोमाङ्गकयागमात्रे सोमपेषणार्थं वेदिर्विहिता । सोमाङ्गकयागविधिश्च द्विविधः-इष्टिः, पशुश्च । चर्वङ्गको याग इष्टिः । तेन दीक्षणीयादिविधिः सोमाङ्गकस्तत्र सोमविधेः । तथा च सर्वासामिष्टीनां दर्शपौर्णमासौ प्रकृतिः । 'प्रकृतिवच्च विकृतिः' इति न्यायेन दर्शधर्मा दीक्षणीयादिष्वतिदिष्टाः । वेदिरपि दर्शधर्मः । यागोपयुक्तं कर्म वेद्यां क्व करणीयमिति दर्शे ऽश्रवणाद्वेदिरप्यतिदेशाद्दर्शे प्राप्ता । एवं सोमाङ्गकत्वेन परिभाषयाऽपि वेद्यन्तरं प्राप्तम् । तथा च वेदिद्वयस्य वैयर्थ्येन शास्त्रार्थत्वाभावादतिदिष्टवेदिं बाधित्वा दीक्षणीयादिषु परिभाषाबोधितवेदिप्रवृत्तिः । परिभाषातो ऽतिदेशस्य दुर्बलत्वात् । सोमयागादौ त्विष्टित्वाभावेन दर्शधर्मानतिदेशाद्बाधनिरपेक्ष एव पारिभाषिकवेदिविधिरिति वैषम्यम् । तथा च वैषम्यपरिहाराय दीक्षणीयादिषु वेद्यतिरिक्तधर्मातिदेश एव । पारिभाषिकवेदिविधिस्तु तत्र निरपेक्ष एव भवतीति स्पष्टं दायभागसंसृष्टिवचन-

द्वयप्रकरणे । एवं—

दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणा हविरग्नयः ॥
अयातयामान्येतानि नियोज्यानि पुनः पुनः ।
इतिवचने दर्भपदं केचित् श्रावणामावास्याऽऽहृतदर्भपरं वदन्ति।
मासे नभस्यमावास्या तस्यां दर्भाश्चयो मतः ॥
अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः ।

इत्यनेनैकवाक्यत्वादिति, तन्न । वैषम्यात् । दर्भा इत्यस्यैकवाक्यत्वाय वचनान्तरसापेक्षत्वात्, कृष्णाजिनादौ तु निरपेक्षत्वाद्वाक्यभेदः स्यात् । न तु समूहालम्बनरूपैकान्वयबोधः स्यात् । सापेक्षस्य विलम्बेनान्वयबोधजनकत्वादिति—दर्भा इति पदं दर्भसामान्यपरमेव । मासे नभस्यमावास्येति वचनं प्रतिप्रसवरूपम् । यथा—

वार्षिकांश्चतुरो मासान् नाऽऽहरेत् मृत्तिकाः, कुशान् ।
असम्भवे त्वादद्दीत सद्यो यस्य प्रयोजनम् ।
इत्यनेन कुशाहरणनिषेधे तस्य प्रतिप्रसवरूपत्वादिति ॥

८४ अथ परिभाषाऽधिकरणम्—

'कर्मण्यङ्गवैगुण्ये जुहोति' इति श्रूयते । तत्र द्रव्यमन्त्राकाङ्क्षायां परिभाषा ग्राह्या । यथा ।

'आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ।
मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः' ॥

मन्त्रस्यानादेशे प्रजापतिर्व्याहृतिमन्त्र इत्यर्थः । यथाऽऽह परिशिष्टे—

प्रजानां पतये त्वेता महाव्याहृतयो ऽव्यया इति ।
एवं देवतायाश्चानादेशे व्याहृतिरेव प्रजापतित्वेन पूज्ये-

स्वर्थः । एवञ्च यत्र विशेषपरिभाषा नास्ति तत्रोक्ता सामान्यपरिभाषा ग्राह्या । तथाहि "चतुर्होत्रां पौर्णमासीम्" इति, "पञ्चहोत्राममावास्याम्" इति च श्रूयते । चत्वारो होत्रा होतारो ऽस्यामिष्टयनेनोपांशुसंज्ञको याग उक्तः । पञ्चहोत्रामित्यनेनाग्नीषोमसंज्ञको याग उक्तः । अनयोर्द्रव्यदेवतासाकाङ्क्षत्वाद्विशेषपरिभाषा ग्राह्या । यथा—

ऐन्द्रं दध्यमावास्यापौर्णमास्योः पयस्तथा ।

तथा ऐन्द्रमित्यर्थः । एवम् "आग्नेयेन पक्षान्ते यजेत" इति श्रूयते । आग्नेयेन—आग्नेयाख्ययागेन । पक्षान्ते—तत्तिथिद्वये । तेन पौर्णमास्यामारम्भः, समाप्तिस्त्वमावास्यायामिति । मध्यस्थप्रतिपदादिचतुर्दश्यन्ततिथिव्यवधानं न दोषाय वचनबलात् । एवञ्चाग्नेयेऽपि द्रव्यदेवताकाङ्क्षायां तयैव परिभाषया तिथिद्वये ऐन्द्रदध्यैन्द्रपयसोरेव ग्रहणमिति ॥

८५ अथ सर्वनामाधिकरणम्-

बहुष्वपि प्रक्रान्तेषु सर्वनामपदेन शीघ्रोपस्थितिकं ग्राह्यम् । यथा श्रुतिः—'इष्टिपूर्वकमेवादः पौर्णमासं हविः' इति । प्रयाजाद्याहुतित्रयमदः पौर्णमासं हविरिष्टिपूर्वकं कुर्यादित्यर्थः । पौर्णमासयागो द्विविधः—एकोऽग्नीषोमीयपुरोडाशद्रव्यकः, अपर उपांशुयागाख्यो ऽग्नीषोमबृहस्पतीन्द्रादिदेवताऽऽज्यद्रव्यकः । यथा 'अग्नीषोमाभ्यां पुरोडाशेन, उपांशुयाजी त्वग्नीषोमबृहस्पतीन्द्रादिभ्य आज्येन जुहोति' इति । अत्र चादःपदस्य सर्वनामत्वादुभयमेवोपस्थितं हविः—पुरोडाशः, आज्यञ्च वाच्यम् । तथा च पौर्णमासयोर्द्वयोरेवेष्टिपूर्वकता प्राप्तेऽत्र सिद्धान्तसूत्रम्—"शीघ्रोपस्थितिकेनानुभयम्" इति । उभयत्र नेष्टि-

पूर्वकता प्राप्यते, अग्नीषोमीयपुरोडाशस्याल्पदेवताघटितत्वेन शीघ्रोपस्थितित्वाददःपदेन तदेवोपस्थाप्यते । अतस्तेनैवान्वय इति दायभागे उक्तम् ।

८६ अथ निषेधपर्युदासौ—

तत्रातिदेशाद्रागादर्थतश्च यत्र प्राप्तिस्तत्र न पर्युदासः । किन्तु निषेध एव, श्रूयमाणस्य प्रापकविधेरभावात् । तादृशविध्यभावे च पर्युदासनञा केन सहैकवाक्यत्वं कर्तव्यमिति ।

अतिदेशाद्यथा—"न तौ पशौ करोति" इत्यनेन पशुयागे प्रयाजानुयाजौ निषिद्ध्येते । न च निषेधः प्राप्तिमन्तरेण सम्भवति, इति दर्शधर्मातिदेशः कल्प्यते ।

रागाद्यथा—'पर्वणि मांसं नाश्नीयात्' इत्यादौ ।

अर्थतो यथा—शरद्वसन्तयोर्नवश्राद्धं विहितम् । तत्र शरत्पदेन शरदादिषण्मासा एव गौणमुख्यभावेन विहिताः । तथा च शरदादिषण्मासेषु नवश्राद्धं कर्तव्यमित्यर्थतो विधिः कल्प्यते । तत्र च 'नन्दायां भार्गवदिने' इत्यादिनिषेधः ।

यत्र तु सामान्यरूपेण शास्त्रतः प्राप्तस्य विशेषरूपेण निषेधस्तत्र पर्युदासः—यथा—"यजतिषु ये यजामहं करोति, नानुयाजेषु" इति श्रुतिः । अत्र च नानुयाजेषु यजतिष्वित्यन्वयः । एकवाक्यत्वानुरोधात् । निषेधे वाक्यभेदापत्तिः । न चेष्टापत्तिः ।

"सम्भवत्येकवाक्यत्वे वाक्यभेदो न युज्यते"

इति वचनात् । तथा चानुयोगिप्रतियोगिनोः समानविभक्तिकत्वेन यो नञा ऽन्योन्याभावो बोध्यते स एव पर्युदासः । तेनानुयाजभिन्नेषु यजतिष्वित्यर्थः । अत्र यजतिरनुयोगी, अनुयाजः प्रतियोगीति ।

तथा—"अहरहर्ददाति" "दीक्षितो न ददाति" इत्यत्र

पर्युदासेन दीक्षितेतर इत्यर्थः । दीक्षितः कृतयज्ञारम्भः । एककर्ममध्ये ऽन्यकर्मनिषेधाद्दानानिषेधः । ननु पर्युदासनञा दीक्षितेतरोऽहरहर्ददातीति सिद्धम् । तथाचैकस्य ददातिपदस्य वैयर्थ्यम्(१) । मैवम् । निषेधपक्षे वाक्यभेदान्मूलभूतश्रुतेरपि वाक्यभेदापत्तेः । तथा चास्मन्मते सम्भेदे नान्यतरवैयर्थ्यमिति न्यायादरः । सम्भेदे एकपदार्थोपस्थाप्यैकबहुपदोपस्थितावित्यर्थः । अयम्भावः—यदि पदोपस्थाप्यपदार्थो नान्वयबोधे निविशते, तदा वैयर्थ्यम् । अत्र तु तन्नास्ति 'बहवो विप्राः सन्ति' इत्यत्र बहव इतिपदवत् । अत एव तत्तत्स्थले एकवाक्यत्वाय दोषद्वयग्रस्ता लक्षणाऽपि समाश्रीयते इति । नचाधिकस्य ददातिपदस्याऽऽकाङ्क्षा नास्ति तत्पदं विनाऽपि तदर्थान्वयबोधादिति वाच्यम् । यत्पदोपस्थाप्यस्यार्थस्य यत्पदोपस्थितिजन्यार्थोपस्थितिं विना अन्वयानुभवविषयत्वाभावस्तत्पदस्य तत्पदे आकांक्षेत्युक्तत्वात् । घटं कलशमानयेत्यादावप्यन्वयबोधो भवत्येव किन्त्वधिककलशपदप्रयोक्तुर्निग्रहमात्रमिति ।

यच्चोक्तं—विप्रेभ्यो दधि दातव्यं, कौण्डिन्याय न दातव्यमित्यादौ दातव्यपदस्याऽऽधिक्यापत्त्या निषेध एव न तु पर्युदास इति । तदपि लौकिकवाक्ये । तत्रैकवाक्यतानिरहे क्षत्यभावात् । नाहि तद्दृष्टान्तेन वेदेऽपि वाक्यभेद आदरणीय इति युक्तमिति । एवं 'रात्रौ श्राद्धं न कुर्वीत' इत्यत्रैकवाक्यत्वानुरोधात्पर्युदासेन रात्रीतरामावास्यायामित्यन्वयः । अमावास्यावचनस्य सावकाशत्वेन पर्युदस्येतरकर्मसम्भवात् । न चैकवाक्यतायां कुर्वीतेति व्यर्थमुक्तोत्तरत्वात् ।

वस्तुतस्तु श्राद्धं कुर्वीतेत्यनेन प्राप्तश्राद्धकरणमुद्दिश्य तत्र

(१) एवञ्च निषेध एवोचित इति ।

न रात्रौ इत्यनेन रात्रिभिन्नः कालो विधीयते । अतो ऽनुवादार्थमेव तत्पदम् ।

अन्येतु अमावास्यादिश्राद्धविधेः प्रातःकालादिदिवसभागचतुष्टयपरत्वेन रात्रौ प्रसक्त्यभावान्निषेधो ऽनुपपन्न इति पर्युदास आश्रीयते इत्याहुः—

अत्र वदन्ति—प्रत्यक्षे आरोपरूपप्रसक्तिसम्भवेऽपि ह्रदे वह्निर्नास्तीति शाब्दबोधस्थले प्रसक्त्यभावेन निषेधबोधानुपपत्तेः प्रसक्तिर्न तत्र हेतुः । नन्वाऽऽकाशं नखाग्रमित्यपि विधिः कथं न कृतः ?, तत्र प्रयोजनाभावात् । अत्र तु तात्पर्यानवधारणनिबन्धनरात्रिश्राद्धकरणवारणस्य प्रयोजनस्य सत्त्वादिति तत्स्वातन्त्र्यम् । नहि विशेषदर्शिभ्रमप्रवृत्तिवारणाय वेद इति युक्तम् । यथा 'दक्षिणामुखः श्राद्धं कुर्यात्' इति विशेषादर्शिनो—देवयागे पूर्वाभिमुखत्वदर्शनाद् भ्रमेण तन्मुखश्राद्धवारणाय तन्निषेधो विधीयते। तथाऽत्रापि रात्रिनिषेधादर्शिनां तत्र प्रवृत्तिः कथं वारणीयेति । उक्ते वह्निर्नास्तीति शाब्दबोधस्थलेऽपि प्रसक्तिरस्त्येव । लोके निषेधवाक्यं हि सन्दिग्धविपर्यस्तान्यतरं प्रत्येव प्रयुज्यते, न तन्निश्चितार्थकं प्रति । तथा चोद्देश्यस्याश्रोतुः सन्देहविपर्यस्तान्यतररूपा प्रसक्तिरस्त्येव । तथा च व्युत्पन्नं प्रति वेदो विहितः, न विशेषादर्शिनं प्रति । तथाचोक्तम्—

'यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः' इति ।

तर्केण विशेषदर्शनप्रयोजकन्यायेन । स धर्मं वेद—व्यवस्थाप्रयोजकप्रवृत्तिप्रयोजनार्थवान् स एवेत्यर्थः ।

अन्येतु पर्युदासपक्षे निषेधप्रसक्तस्य नञो लक्षणा स्यात् । न चात्र लक्षणाबीजमनुपपत्तिरस्तीति । अत्र हेतुः-अमावास्यापदात् सामान्यात् रात्रिपरस्यापि प्राप्त्या निषेधो वाच्यः । स

न सम्भवति उपजीव्यबाधापत्तेः । तथा च बाधवारणायोभय-विधिसार्थक्याय च विकल्पो वाच्यः । राज्यमावास्याऽवच्छेदेन निषेधेन बाधाद्विकल्पे च तदभावात् । तथा चामावास्या-विधेर्दिवांशश्राद्धविधौ निरपेक्षत्वाद् राज्यंशे विधौ विकल्प-कल्पनामपेक्षत्वाद्विधेः सापेक्षत्वानिरपेक्षत्वलक्षणं वैषम्यं स्या-दिति विधित्वानुपपत्त्या लक्षणेति—(१)

अत्र वदन्ति—नाहं सावकाशनिरवकाशविध्योर्विकल्पस्तु-ल्यबलवत्त्वाभावात् । निरवकाशत्वेन निषेधस्य बलवत्त्वात् । (२)पदाहवनीयस्थले निरवकाशस्य बलवत्त्वेन कल्पनत्वात् ।

इतरे तु प्राप्तेनेष्टसाधनत्वबोधः । तथा चामावास्यापदस्य दिवारात्रिसामान्यपरत्वे राज्यंशे इष्टसाधनत्वबोधे तज्ज्ञानस्य राज्यंशे भ्रमत्वमापद्येत । तत्र च वेदस्य भ्रमत्वे ऽश्वमेधादिबो-धकवेदे ऽनाश्वासापत्त्या ऽननुष्ठापकत्वलक्षणाप्रामाण्यं स्यात् । अतः प्राप्त्यभावार्थं पर्युदासलक्षणेति वदन्ति । तन्न । तात्पर्यभ्रमे वेदस्यापि भ्रमजनकत्वादव्यवस्थादर्शनात् । तथा चाज्ञा-ततात्पर्यकत्वेन भ्रमजनकत्वं, न वेदत्वेन । अतो वेदत्वेना-ऽऽश्वास एव ।

अन्येतु अमावास्याविधेर्दिवापरत्वमेवास्तु, किं पर्युदासनि-षेधाभ्याम् । तदपि न । दिवापरत्वे तात्पर्यग्राहकप्रकरणाद्यभावात्त-त्तात्पर्यग्रहार्थमेव निषेधवचनस्य सार्थक्यात् । दृष्टञ्च तात्पर्यग्रहार्थं विशेषवचनम् । यथा—'पायसेन श्रियै जुहोति' इति । श्रीहोमे पायसशब्दस्य श्रीवासाख्यगन्धद्रव्यस्यापि वाचकत्वात्तात्पर्यग्र-हाय वाक्यशेष उक्तः—'क्षीरश्रृतस्तण्डुलः पायसो भवति' इति । यथा वा 'यवमयश्चरुर्भवति' इति । अत्र यवशब्दस्य—

(१) अत्रत्य(२३)त्रयोविंशाधिकरणे ।

यवेभ्यः स्वाहेति धान्ये निरूढलक्षणया धान्येऽपि यवपदप्रयोगदर्शनात्तात्पर्यग्रहाय वाक्यशेषः—

"वसन्ते सर्वसस्यानां जायते यत्र शातनम् ।
मोदमानाश्च दृश्यन्ते यवाः कणिशशालिनः" इति ॥

ननु पर्युदासपक्षेऽपि कथं लक्षणा ?, अत्यन्ताभाव इव भेदेऽपि नञः शक्तेः । मैवम् । 'अन्यायश्चानेकार्थे' इति न्यायेन नानार्थत्वायोगात् । तथात्वे च अन्योन्याभावे लक्षणैव तस्यैवाभेदान्वयात् । तथा चैकवाक्यार्थ एव पर्युदास इति ।

परे तु पर्युदासपक्षे अमावास्यायामित्यत्र यथा रात्रीतरान्वयस्तथा ऽष्टकादावपीति रात्रिश्राद्धनिषेधवचनस्याऽऽवृत्त्यापत्तिरिति, सत्यम् । सति तात्पर्ये आवृत्त्यकल्पना विशेषवचनाविषयसर्वश्राद्धतिथीनामेव दिवापरत्वग्रहस्याऽऽकाङ्क्षितत्वादाक्षिप्तत्वाद्विनैव सर्वत्रान्वय इति सर्वत्रान्वये एकवाक्यस्यैव तात्पर्यमिति ।

तुल्यबलवत्त्वे विकल्पो यथा—'अतिरात्रे षोडशिनं गृह्णाति' 'नातिरात्रे षोडशिनं गृह्णाति' इत्यत्र उभयोरेव निरवकाशत्वात्तुल्यत्वम् । षोडशकला अस्य सन्तीति षोडशी सोमः । प्रकृते स दृक्षविशेषः । तथा च प्रकृतियागे सोमग्रहणस्य विहितत्वाद्विकृतियागे ऽतिरात्रे ऽतिदेशेन सर्वदा प्राप्तत्वात्तद्विकल्पार्थं वचनम् । नच यदि षोडशिग्रहणं विना यागसिद्धिस्तदा तद्ग्रहणोपदेशो व्यर्थः । फलभूमार्थं ग्रहणोपदेशात् ।

८७ अथ यद्भक्तन्यायः—

ननु तत्तद्देवपूजायामावरणपूजा क्रियते तत्कथम् ?। न तत्प्रधानस्वरूपनिर्वाहकं प्रधानस्वरूपस्य गन्धाद्युपचारैरेव सिद्धेः । नाप्यदृष्टद्वारा, मानाभावात् । कदा वा तत्कार्यमत्र सिद्धान्तः—"यो यद्भक्तः स तद्बलात्" इति । तद्बलात्प्रधानपूजनात्म-

ज्येष्ठे मासि सिताष्टम्यां यः पूजयति केशवम् ।
न दुर्गतिमवाप्नोति वाजपेयञ्च विन्दति ॥
शिवरहस्ये—
शुक्लाष्टम्यां शुक्रवारे यः पूजयति शङ्करम् ।
दुर्गतिं न लभेच्चैव वाजपेयफलं लभेत् ॥

अत्र मूलभूतश्रुतिद्वयकल्पनाभिया केशवपदस्य लक्षणया शङ्करपरत्वमेवास्तु । नच विनिगमनाविरहः अष्टमीतिथेः शैवत्वेनोक्तत्वात् । यथा- 'हरस्य तिथिरष्टमी' इति । तथा चात्र लक्षणा न क्रियते, किन्तु मूलश्रुतिद्वयकल्पनैवेति वदन्ति । एवं ते वक्तव्याः—धान्यमसिमन्त्रे धान्यपदेन तण्डुललक्षणा कर्तव्या मन्त्रपाठस्यादृष्टार्थकत्वकल्पनयैवोपपत्तेः । केशवपदे च न लक्षणा लक्षणाबीजस्य मुख्यार्थानुपपत्तेरभावादिति ।

९० अथ गिरागिराऽधिकरणम्—

अग्निष्टोमे "ऋत्विजो देवानामन्वर्यन्ति, यज्ञायज्ञा वो ऽग्नये गिरागिरा च दक्षसे" इति श्रुतिः । अस्यार्थः—वो युष्मभ्यमिन्द्रादिभ्यः अग्नये च यज्ञा यज्ञा यज्ञे यज्ञे गिरा गिरा तत्तन्मन्त्रेण दक्षसे ऽहं यजे। 'दक्ष दाने' इतिधातोर्लेट उत्तमपुरुषैकवचनामदू, तस्यैत्वं "सिब्बहुलं लेटि"इति सिपि दक्षसे इति । यज्ञायज्ञा इति "सुपां सुलुग्" इति सप्तमीस्थाने आजादेशः । उक्तश्रुत्यनन्तरं "न गिरागिरेति ब्रूयात् । यद्गिरागिरेति ब्रूयादात्मानमेव तदुद्गाता गिरेत् । तस्मादैरं कृत्वोद्गेयम्"इति । अस्यार्थः—ऋत्विजो देवानिति यदुक्तं तत्रोद्गातृव्यतिरिक्ता ऋत्विज इति बोध्यम् । तत्र हेतुमाह—उद्गाता न गिरागिरेति ब्रूयात् यदि वदेत् तदाऽऽत्मानमेव गिरेन्नाशयेत् । तर्हि किं वाच्यम् । तत्राऽऽह- तस्मादिति । ऐरं गिरागिरेतिपदस्थाने इरापदयुक्तं मन्त्रं कृत्वोद्गात्रोद्गेय-

मित्यर्थः । तथा चोद्गात्रैवं पाठ्यम्—"यज्ञायज्ञा वो अग्नये इरा इरा च दक्षसे" इति(१) । इराइरेति-"सुपां सुलुग्" इति तृतीयाया आजादेशः । तेन इरया मन्त्रवाण्या दक्षसे इत्यर्थः । इराशब्देन वाण्युच्यते इति ॥

९१ अथ कलञ्जाधिकरणम्—

'न कलञ्जं(२) भक्षयेद्' इत्यत्र लिङा बोधितङ्कार्यत्वमभावेऽन्वेति । तेन कलञ्जभक्षणाभावविषयकं कार्यमित्यन्वयबोधः । तथा च निषेधापूर्वस्य विहितादृष्टत्वेन संस्कारसापेक्षोत्पत्तिकत्वादनुपनीतानामपरिणीतानां कन्यानाञ्च नैतद्विधिविषयत्वम् । न चाष्टकादिश्राद्धाधिकारो ऽनुपनीतानामपि दृश्यते इति नादृष्टे संस्कारापेक्षेति वाच्यम् । बाधकाभावे सतीति विशेषणात् । तत्र च—

'एतच्चानुपनीतोऽपि कुर्यात् सर्वेषु पर्वसु'

इत्येव वचनं बाधकम् । अन्यथा ऽनुपनीतानां दर्शादियागाधिकारोऽपि स्यात् । इत्यत्र सिद्धान्तसूत्रम्- "नैतदन्यनिषिद्धत्वात्" इति । अस्यार्थः-एतद्भवदुक्तं न । कुतः ?, अस्य कलञ्जभक्षणस्य निषिद्धत्वात् । अयम्भावः -कलञ्जभक्षणस्य रागप्राप्तविषयकनिषिद्धत्वेन पापजनकत्वव्याप्तत्वात् । न च पापोत्पत्तौ संस्कारः सहकारी । तथा च असंस्कृतैरपि कलञ्जभक्षणादितो निवर्तितव्यम् । अष्टकादिश्राद्धवदेतददृष्टेऽपि न संस्कारः सहकारी । तत्र वचनवदत्र (कलञ्जभक्षणे) न्यायस्य सत्त्वादिति ।

---

(१) सामगा इरापदगानार्थं गानशास्त्रपरिभाषयेकारस्य स्थाने आकारो यकार ईकारश्चेति त्रीन्वर्णान् प्रयुञ्जते । तत आर्यीरा इत्येव गातव्यम् ।

(२) विषाक्तशरविद्धपशुमांसं कलञ्जम् ।

९२ अथ लिङ्गसमवायन्यायः—

इष्टकाचयनयागे 'प्राणभृता इष्टकां संस्करोति' इति श्रूयते। प्राणभृता—प्राणभृन्मन्त्रेण। अत्र च दशानामिष्टकानां यागे उपयोगः। तथा श्रुत्यन्तरं "प्राणभृत उपदधाति"इति। अस्यार्थः—प्राणभृन्मन्त्रेण संस्कृता इष्टका अग्निसमीपे दशादिक्षु स्थापयतीति। तथा च सर्वेष्टकानामेव संस्कारः, पूर्वश्रुतौ इष्टकामिसेकवचनस्याविवक्षितत्वात्। अत्र सिद्धान्तसूत्रम्—"लिङ्गसमवायात्" (अ०१पा०४अधि०१८सू०२८) इति। लिङ्ग्यते ज्ञाप्यते ऽनेनेति लिङ्गं, प्राणभृत्पदवाच्याः संस्कृता इष्टकास्तत्समवायात्तत्सम्बन्धादिष्टकागणस्यैवाजहत्स्वार्थलक्षणया ऽभिधानमिति प्राणभृत इति बहुवचनस्योपपत्तेरुत्तरश्रुतेर्लक्षणयैवोपपत्तौ पूर्वश्रुतिबाधस्यान्याय्यत्वम्। तस्य निरपेक्षत्वेन बलवत्त्वात्। नचेष्टकासंस्कारे ऽनध्यवसायः पुरोडाशकपालवदुपपत्तेः।

९३ अथ प्रकृतिभागव्यवस्था—

"कृष्णाऽन्याक्षीरे कृष्णलान् श्रपयेत्, विष्णुब्रह्मरुद्रेन्द्रादित्यमेभ्यो जुहोति इदं विष्णुः, ब्रह्मादेवानां, नमः शम्भवे, त्वाताविमित्रं, आकृष्णेन, असियमइति" इति श्रुतिः। कृष्णाऽन्या—कृष्णा गौः। अत्र यमेभ्यइति बहुत्वश्रुतावपि न साहित्येन देवतात्वम् प्रत्येकमन्त्रोपदेशादिति। अस्य विकृतियागे श्रुतिः "तथैव नीवारान् श्रपयेत्, तथैव जुहोतीत्यायुष्कामः, त्र्यंशं विष्णवे, साम्येनान्येभ्यः" इति। चरुत्रिभागं कृत्वा एकमंशं विष्णवे ऽन्यद्व्यंशं समभागेन ब्रह्मादिभ्यो जुहुयादित्यर्थः। तथा च प्रकृतियागे कृष्णलचरोर्न त्र्यंशकरणम् विकृतावेव तदुपदेशात्। इत्यत्र सूत्रम्—"असति विरूपे पूर्वापरयोः साम्यम्" इति। विरूपे बाधके ऽसति पूर्वापरयोः प्रकृतिविकृत्योः

साम्यमेव । तेन कृष्णलचरोरपि ध्यंशकरणमिति ।

पृथिवीयागे श्रूयते-"पृथिव्यै क्षीरेण दध्ना च जुहोति, इरावतीति वायुं पिबति, क्षीरं, दधि च" इति । अस्य विकृतौ श्रुतिः "वायवे जुहोति, चतुःपलं चतुर्धा ऽश्नाति" इति । अत्र पलचतुष्कस्य चतुर्भागं कृत्वा ऽशनं विहितम् । प्रकृतिविकृत्योः साम्यकथनात्-प्रकृतावपि तथैव भागस्य वाय्वादित्रयाणां प्राप्तत्वादाह-असति विरूप इति । वायोर्गुरुत्वाभावेन पलाभावाद्भागासम्भव इति प्रकृतौ दधिपयसोरेव भागकरणं, वायोः सकृदेव पानम् । एवं विकृतियागे वायुभक्षणं नाङ्गं तस्य पलासम्भवात् । पलत्वेनैव भक्षणविधानात् । तथा च—

यो येन संपिबेद्वर्षं सोऽपि तत्समतामियात् ।
पादन्यूनञ्चरेत्सोऽपि तस्य तच्च व्रतं द्विज ॥

इति व्यासवचनम् । यः पापी येन पापिना सम्पिबेत्संसर्गी स्यात् तस्य व्रतं पादन्युनं स कुर्यादित्यर्थः । तेन ज्ञानपूर्वकब्राह्मणघातिनि मनुना द्वादशवार्षिकादित्रयोदशप्रायश्चित्ताभिधानात्तन्मध्ये मरणस्य विधानेऽपि न तस्यातिदेशः तत्संसर्गिणि मरणस्य पादन्यूनत्वासम्भवात् किन्तु द्वादशवार्षिकमेव पादन्यूनं प्रायश्चितमिति प्रायश्चित्तविवेकः । एवं प्रकृतिविकृत्योः साम्यकथनाद्विकृतावाभ्युदयिके 'कराग्राग्रपवित्रकान्' इति श्रुतेः पार्वणेऽपि तथैव विशेषानुपदेशादिति नवीनगौडाः ।

मैथिलास्तु 'पित्र्ये द्विगुणा दर्भा दक्षिणाग्राश्च' इति परिभाषया पवित्रस्य पार्वणे ब्राह्मणकरे दक्षिणाग्रत्वमेव, तथाऽऽभ्युदयिकेऽपि तथात्वप्राप्त्या तद्बाधाच्च कराग्राग्रेति । अत एवार्घ्याणामुत्सर्गे द्विगुणकुशाग्रादिशि नानध्यवसायः किन्तु दक्षिणाग्रा एव धार्या इति वदन्ति ।

अत्र वदन्ति-पार्वणस्याभ्युदयिकप्रकृतित्वे 'प्रकृतिवद्विकृतिः' इतिन्यायेन पार्वणाङ्गसमुदायस्यैवातिदेशः । तथा चाष्टकाश्राद्धस्यापि पार्वणतया तद्धर्माणामपूपमांसशाकानामावृश्यकानामङ्गानामपि प्राप्तिः स्यात्पार्वणपदवाच्यता च तस्यापि । यथा भविष्ये—

अमावास्यायां क्रियते पार्वणं संमुदाहृतम् ।
क्रियते वा पर्वणि यत्तत्पार्वणमिति स्थितिः ।

तथा चामावास्याश्राद्धत्वं पर्वश्राद्धत्वञ्च पार्वणपदशक्यतावच्छेदकमतोऽष्टकाश्राद्धं पार्वणपदवाच्यमेवेति । अत्र नवीनाः-यद्यपि पार्वणपदस्योभयमपि शक्यं, तथापि अमावास्याश्राद्धे रूढेस्तस्य शीघ्रोपस्थितिकत्वात्पार्वणविधिना कुर्यादित्यत्रामावास्याश्राद्धमुपस्थापितम् । पर्वश्राद्धे यौगिकत्वात्तस्य चावयवार्थोपस्थितयधीनत्वाद्विलम्बोपस्थितिः । ततः शीघ्रोपस्थितिकेनैवान्वयबोधः स्यादिति नापूपादीनामतिदेश इति बहुदिनभावनापूर्वकं समाधानमाहुः । सामान्यातिदेशे विशेषानतिदेश इति न्यायात्पार्वणविशेषाष्टकाधर्मस्याप्राप्तत्वात् । स तु न्यायो यथा—"विद्याकाम ऊर्जमारभ्य वर्षं प्रति कृष्णचतुर्दश्यां रुद्राय तिलैर्जुहोति इमारुद्रायेति, तपस्ये तु यवान् श्रपयति" इति रुद्रयागमुक्त्वा "एवं दाम्पत्यसर्वकामः प्रत्यष्टम्यम्बिकायै जुहोत्यम्बेऽम्बिकइति" इति श्रुतावुक्तम् । ऊर्जे-कार्तिकमिति । तपस्ये-फाल्गुने । अत्र च रुद्रयागः अम्बिकायागस्य प्रकृतिरेवमित्युक्तेः । तथा च रुद्रयागे फाल्गुनकर्तव्ये चरुरङ्गम् । तथा चाम्बिकायागे सर्वमासेष्वेव चरोरप्यतिदेशात्माप्ता अम्बिकायागास्तिलैश्चरुणा च कार्यः ।

नच तपस्ये इतिश्रुतेः कथं सर्वमासेष्विति वक्तव्यम् । त-

पस्यस्य चतुर्दशीधीशेषत्वात्तपस्ये च चतुर्दश्यामित्यन्वयात् । तथा अष्टम्यां न तपस्यान्वयो ऽन्यान्वितत्वात् । एवञ्च केवलमतिदेशेन यवस्यैवान्वयः । इत्रत्र सिद्धान्तसूत्रम्-"तुल्यप्राप्त्या नातुल्यप्राप्तिः" इति । सामान्यस्यातिदेशेन न विशेषस्यातिदेश इत्यर्थः । तेनाम्बिकाहोमे न चरुः तस्य मासविशेषणीयत्वेन विशेषत्वात् ।

एवं सांवत्सरिकैकोद्दिष्टं 'प्रकृतिराद्यैकोद्दिष्टे च "इह लोकं परित्यज्य" इति मन्त्रोऽङ्गम् । सांवत्सरिके एकोद्दिष्टप्रिकृतौ तस्याङ्गत्वं स्यात्तत्राप्येष एव न्याय इति ।

यच्चोक्तं-पार्वणपदस्योभयमेव शक्यं, तदपि न। "अन्यायश्चानेकार्थत्वम्" (अधि० ४९) इति सूत्रात। अमावास्याश्राद्धत्वमेव शक्यतावच्छेदकं, नान्यत् । तथा हि अमावास्यायामिति यद्यधिकरणसप्तमी तदा ऽमावास्याधिकरणकं भाद्राद्येकोद्दिष्टमपि पार्वणं स्यात्, ततश्चामावास्यात्वेन यत्र निमित्तता तत्पार्वणं नत्वमावास्यानिमित्तकमात्रम् । अमावास्याया मृताहत्वे मृताहनिमित्तकस्यामावास्यानिमित्तत्वात् । एवं पर्वणीत्यत्राधिकरणसप्तमीत्वेन स एव दोषः । अतः पर्वत्वेन निमित्तता वाच्या, सा च न सम्भवति अष्टकादिश्राद्धे पर्वणीत्युल्लेखापत्तेः । निमित्तावच्छेदकरूपेण निमित्तस्योल्लेखात् । न च निमित्तानामिति श्रवणान्निमित्तस्यैवोल्लेखो न तु तत्त्वेनेति वाच्यम् । एवमशौचान्तद्वितीयेऽह्नि इत्यादेरनुल्लेखात् । निमित्तस्य तद्दिनस्य अध्येतनेनैवोल्लेखात् । तथा चामावास्यात्वावच्छिन्ननिमित्तताकश्राद्धत्वं पार्वणपदशक्यतावच्छेदकम् । कथं पार्वणपदप्रयोगस्तत्राह—क्रियते इति । वा एवार्थः ।

"वा स्याद्विकल्पोपमयोरेवार्थे चावधारणे"

इति कोशात् । पर्वण्येव क्रियत इति पार्वणम् । तथा च योगस्यापि दर्शनेन पङ्कजपदवद्योगरूढिः प्रदर्शितेति ।

एवञ्चामावास्यायां पार्वणश्राद्धमित्येव प्रयोगो नतु अमावास्यानिमित्तकमिति श्राद्धविशेषणम् । पार्वणपदेनैव तदर्थोपस्थितेः । अमावास्यायामिति निमित्तसप्तमीमुक्त्वा केचिद्विशेषणं वदन्ति । तन्न । अमावास्यास्त्यास्तर्हि अधिकरणत्वेनालाभात् । नह्येका सप्तमी सकृदुच्चरिता उभयमर्थं बोधयति । ततश्चाष्टकायामपि पार्वणविधिनेति प्रयोज्यम्, न पार्वणमिति मघादिश्राद्धवदिति ।

अत एव ।

पार्वणे त्वष्टकाश्राद्धे चान्द्रमिष्टं तथाब्दिके ।
इत्यत्र पार्वणाष्टकाश्राद्धयोर्भेदेनोपादानम् ॥

अथ कस्तावत्प्रकृतिविकृतिभावः ? ।

न तावत्कार्यकारणभावः । घटस्य कुलालविकृतित्वापत्तेः । मृद्विकारो हि घटः । नच समवायेनेति तत्र वाच्यम् । गुणस्य द्रव्यविकृतित्वापत्तेः । अथ कारणतावच्छेदकाश्रयकार्यत्वं विकृतित्वम् । तथा च सुवर्णत्वं कुण्डलकारणतावच्छेदकं तदाश्रयं कुण्डलमिति सुवर्णविकारं तदुच्यते । नचैवं कार्यस्य स्वजनकत्वापत्तिरिति वाच्यम् । स्वरूपयोग्यत्वस्येष्टत्वात् । फलोपधानस्य तु पूर्ववर्तित्वाभावादभावः, जातघटं प्रति भाविदण्डवत् । मैवम् । उक्तविकृतित्वमाभ्युदयिकादावसत्त्वेन प्रकृतानुपयोगीति ।

ननु सुवर्णादिसाधारणमिदं प्रकृतित्वं विकृतित्वञ्च नास्ति यागादेः प्रकृतित्वम्—अतिदिश्यमानाङ्गप्रतियोगित्वम् । यस्याङ्गमतिदिश्यते तत्प्रतियोगि । तादृशानुयोगित्वञ्च विकृतित्वमिति चेदेवमन्योन्याश्रयापत्तिः । प्रकृतित्वज्ञाने प्रकृति-

वद्विकृतिरित्यतिदेशः। अतिदेशघटितस्य विकृतित्वमिति। उच्यते- नात्रान्योन्याश्रयः। स हि द्विविध एव दुष्टः। उत्पत्तितो ज्ञप्तितश्चेति। नाद्यः—प्रकृतित्वस्याजन्यत्वेनाऽतिदेशानपेक्षणात्। न द्वितीयः प्रकृतित्वस्यातिदेशज्ञानं विनापि क्वचित्तद्वदिदमित्यादिवाक्यत्वात्, क्वचिन्न्यायगम्यत्वात्।

किञ्चातिदेशज्ञानं न, प्रकृतित्वज्ञानाधीनं लक्षणप्रविष्टातिदेशपदादेव तदुपस्थितेः।

नन्वतिदेशात्प्राप्तिरित्यत्रानिषिद्धविषये प्राप्तिः प्रमैव वाच्या। तथा चातिदेशस्यातिरिक्तप्रमाणत्वापत्तिः। प्रत्यक्षानुमानयोरसम्भवात्, शब्दस्याभावाच्च। मैवम्। अन्यत्र श्रुतस्य प्रकृतेऽश्रुतस्य कल्पनमतिदेशः। "पारमेष्ठ्यकामो विरिञ्चये जुहोति ब्रह्मादेवानामिति, प्रोद्गातृभ्यो हुतशेषफलचमसमभक्षं प्रयच्छति" इति श्रूयते। प्रोद्गातृभ्य इति बहुवचननिर्देशात्प्रोद्गात्रादिभ्य ऋत्विग्भ्य इत्यर्थः। अत्र यद्यपि होमस्य द्रव्यं नोक्तं तथाऽपि हुतशेषमिति श्रुत्या फलचमसस्य होमद्रव्यत्वं कल्प्यते नातिदेशादतोऽन्यत्रश्रुतस्येति। श्रुतस्य—प्राप्तस्य। तेनातिदिष्टातिदेशे नाव्याप्तिः। यथा पार्वणातिदेश एकादिष्टे, तदतिदेशः साम्वत्सरिके इति। "चक्षुष्कामआदित्यायार्कसमिधा जुहुयात्" इति। चित्रं देवानामिति सहस्रं सौरलोककामस्तथैव तस्मै जुहोति" इत्यत्र तथैवेति श्रुत्यैव पूर्वोक्तसर्वाङ्गप्राप्तिर्नातिदेशादतोऽतिव्याप्तिवारणाय प्रकृतेऽश्रुतस्येति। वस्तुतोऽश्रुतस्येति न देयम्। तथैवेत्यनेनाप्यतिदेशदर्शनादिति। कल्पनन्त्वनुमानम्—यथाऽयं यागः प्रकृतिविकृतियावदङ्गाङ्गकः विकृतित्वात् दर्शविकृत्याष्टमिकयागवत्। नच दृष्टान्तेऽसिद्धिः पूर्वपूर्वानुमानाधीनत्वात्। यद्वा प्रकृ-

तिश्रुतानामेव वाक्यानां न्यायेन समभिव्याहारः कल्प्यते । तथाच शब्द एवातिदेशः ।

नन्वतिदेशस्य शब्दत्वे ऽतिदिष्टनिषेधस्य पर्युदासत्वासम्भवः श्रुत्यभावेनैकवाक्यतायां असम्भवादिति । न, तत्र पर्युदासत्वे वैयर्थ्यापत्तेः । 'एकोद्दिष्टे नावाहनम्' इत्यत्र पर्युदासत्वे आवाहनभिन्नं कुशासनादि कुर्यादित्यर्थः स्यात्तस्य चातिदेशादेव प्राप्त्या नावाहनमिति व्यर्थं स्यात् । आवाहनञ्च स्यात्तस्याप्यतिदेशात् । 'आवाहनरहितं कुर्यात्' इत्यर्थे तु निषेधे एव पर्यवसानमिति ।

९४ अथ स्थालीपुलाकन्यायः—

"श्येनेनाभिचरन् यजेत । मेमीक्षीरेण श्येनं श्रपयति । कालान्तकयमरुद्रेभ्यो जुहोति, कालःकरालइति, कार्षिरमीति, असियमइति, यातेरुद्र इति । अष्टाशासु भस्म किरति । अष्टलोहपात्रे पुलाकान् दहति स्थाल्यां वा"इति श्रूयते । कस्य भस्मेत्यतो ऽष्टेति । अष्टलोहानि यथा—

काञ्चनं रजतं ताम्रमारकूटं तथायसम् ।

त्रपुसीसं रङ्गकांस्ये च लोहाष्टकमुदाहृतम् ॥ १ ॥

तथा शैवयागे "भस्मतिलकी मृत्युञ्जयाय जुहोति" "अभिचारशमनाय गोमयचूर्णानि लोहाष्टकपात्रे दहति तद्भस्म भवति" इति । एवञ्च लोहाष्टकपात्रसम्पत्त्या शिवयागसङ्कल्पे कृते तत्पात्रापचारी कथं कर्म कुर्यात् ?। कर्मासम्पत्तौ च प्रत्यवायी स्यादत्र सूत्रम्-"स्थालीपुलाकवत्" इति। यथा-पुलाकदाहे-लोहाष्टकापचारे स्थाली ग्राह्या, तन्न्यायादत्रापि तथा । एवं

गवामभावे दातव्यं तन्मूल्यं न तु संशयः ।

इति गोवधप्रकरणोक्तमन्यत्रापि सम्बध्यते । तथा

चान्यप्रकरणोक्तमवश्यापेक्षणीयमन्यत्रापि ग्राह्यमिति । अत एव मैथिलाः—यज्ञप्रकरणोक्तं "पवित्रेस्थोवैष्णव्यौ" इति मन्त्रद्वयं श्राद्धार्थपवित्रेषु न वदन्ति, अमावास्यापेक्षणीयत्वाभावात् । अवश्यापेक्षणीयत्वे दक्षिणकरधारणार्थपवित्रेऽपि तदापत्तेः । नचैवं श्राद्धेऽसंस्कृतपवित्रान्वयप्रसङ्गः । तत्र द्रव्यान्तरवत्कूर्ष्णी प्रोक्षणेन संस्कारात् । वस्तुतस्तु "बर्हिषः प्रादेशमात्रे पवित्रे कुरुते, ओषधीमन्तर्धाय छिनत्ति, न नखेन, पवित्रेस्थोवैष्णव्याविति । अथैनमद्भिरनुमार्ष्टि विष्णोर्मनसा पूतेस्थ" इति गोभिलवचनं यज्ञप्रकरणपठितमपि परिभाषारूपम् । अन्यथा श्राद्धे नखेनापि छेदनं स्यात् । तर्हि श्राद्धे ओषधिव्यवधानेन छेदनमायातमिष्टापत्तेः । ओषधिर्यवादिः । धारणार्थपवित्रे तु ओषध्यादेरन्वयोऽस्त्येव, नतु मन्त्रान्वयः । स्नानं विना मन्त्रपाठेऽनधिकारात् । स्नानेऽपि पवित्रधारणस्याङ्गत्वात् । नचानोऽधिस्नातेन समन्त्रकपवित्रं क्रियतां, विशेषवचनाभावे अङ्गानां समानकर्तृत्वनियमात् । एवं पूर्वेद्युःकृतसमन्त्रकपवित्रस्य न कर्माङ्गत्वं विशेषवचनाभावे समानकालकर्तव्यत्वात् । नच स्नानातिरिक्तकर्मसु मन्त्रान्वयोऽस्तु, मन्त्रपाठेऽपि पवित्रधारणस्याङ्गत्वादनवस्थापातात् । तथा च कृष्णले ऽवघातबाधवद्धारणपवित्रे मन्त्रबाधः । नच गोभिलेन पिण्डस्थाने पवित्रेण रेखोक्ता, तत्र मन्त्रान्वयोऽस्त्विति वाच्यम्। तत्र पिञ्जूल्या इति श्रवणात् । तथा च पवित्रपदेन यत्राभिधानं तत्र मन्त्रस्याङ्गता । नचैवं सर्वाङ्गपवित्रे मन्त्रान्वयः । इष्टापत्तेः । पद्धतौ तादृशलेखनन्तु आज्यसंस्कारकपवित्रमग्नावुपदेशात् तत्रापि तथा प्राप्त्येति ।

अत्र वदन्ति—यज्ञे 'बर्हिषः पवित्रे कुरुते' इति श्रुतेर्मध्य-

एव समन्त्रकपवित्रकरणं, श्राद्धे तु "चमसेषु पवित्रान्तर्हितेष्वपः क्षिपति शन्नोदेवीरिति" इति तदानींकरणश्रुतेः श्राद्धारम्भात् पूर्वं समन्त्रकपवित्रकरणमस्तु । यथा—

"शुचींश्च विदुषो विप्रान् सम्यग्यत्नेन भोजयेत्" ।

इत्रत्र श्राद्धभोजनसमये तेषां न शुचित्वकरणं, किन्तु श्राद्धारम्भात्पूर्वं शुचित्वविशिष्टा एत ते भोजनसमये इति । यथा वा चमसानां न तदा करणमिति । तन्न, श्राद्धात्पूर्वं पवित्रं यत्कर्तव्यं तत्र मन्त्रपाठो न । तद्विधानं द्विविधम्—काम्यं, नित्यञ्च । नाद्यं, फलाश्रुतेः । विश्वजिन्न्याये च तत्र पृथक् सङ्कल्पः स्यात् । न द्वितीयमकरणे प्रत्यवायाश्रुतेः, प्रायश्चित्तानुपदेशाच्च । किन्तु पवित्रविशेषणत्वेनाङ्गत्वम् । पवित्रमप्यस्य विशेषणत्वेनाङ्गमतो मन्त्रविशिष्टं पवित्रमर्घ्ये ऽपेक्षितम् । अतस्तदानीमेव समन्त्रकपवित्रकरणं, न श्राद्धारम्भात्पूर्वम् । नच तदानीमपि पवित्रप्रोक्षणमपेक्षितमिति वाच्यम् । दलद्वयं सन्निधाप्य प्रोक्षणं कार्यमर्घ्यसमये तेनैव दलद्वयेन पवित्रं कर्तव्यमिति । नच श्राद्धोपयुक्तयावद्द्रव्यप्रोक्षणमादौ कर्तव्यं पवित्रञ्च तदुपयुक्तं न दलसामान्यमिति वाच्यम् । तथा सति प्रोक्षितपिण्डदानापत्तेः । आकारविशेषविशिष्टस्यापि तत्त्वात्तदभावात् । तथा च पिण्डघटकान्नादिप्रोक्षणेन यथा पिण्डस्य संस्कारः, तथा पवित्रघटकदलप्रोक्षणादेव पवित्रसंस्कारः । किञ्च पवित्रप्रोक्षणं "विष्णोर्मनसा पूतेस्थ" इति मन्त्रकर्तव्यं, तच्च नादौ विहितं किन्त्वर्घ्यसमये एवेति । ननु पवित्रे इति द्विवचनानुपपत्तिः, पवित्रपदस्य दलद्वयवाचकत्वात् नानार्थत्वकल्पने मानाभावादिति । मैवम् । मन्त्रपाठकरणकच्छेदान्मन्त्रपाठकाले छेदाभावेन पवित्रत्वानिष्पत्तेरिति पवित्रपदं तदारम्भकदलपरम् । एवं प-

वित्रे इति मन्त्रेऽपि । "विष्णोर्मनसा पूतस्थ" इत्येतत्पाठकाले पवित्रवाक्यत्वेऽपि तत्र विशेष्यपदाभावादनन्वयेऽन्वयार्थं पूर्वमन्त्रस्थं पवित्रे इति पदमनुषज्यते । तस्य च दलपरतैवोक्ता । नह्येकं पदं तत्र दलमात्रपरमत्र दलद्वयपरं भवितुमर्हति । तदात्वनुषङ्गः । अनुषङ्गे तत्पदस्यैव पदान्तरसमभिव्याहारतात्पर्यम् । आवृत्तौ तु तादृशपदान्तरकल्पनम् । तथा च पवित्रे कुरुते इत्यनेन दलद्वयविषयककृतिर्विहिता । तत्र किंक्रियानुकूला कृतिरित्यत्राऽऽह—छिनत्तीति । इति सर्वं समञ्जसम् ।

इति श्रीमहामहोपाध्याय पं० रामकृष्णभट्टाचार्य विरचिताऽधिकरणकौमुदी समाप्ता ॥

अस्मिन् ग्रन्थे ऽनिर्दिष्टानि कानि चित् बहुशश्चोपयुक्ताधिकरणानि प्रदर्श्यन्ते ।

१ अथ वाजपेयाधिकरणम् ।

इदं श्रूयते "वाजपेयेन स्वाराज्यकामो यजेत" इति । वाजोऽन्नं तस्य पेयं द्रवीभूतो रसो यवागूरिति यावत्(१) । अत्रोक्तव्युत्पत्त्या वाजपेयशब्दस्य प्रसिद्धार्थकत्वेन "दध्ना जुहोति" इतिवद् यजतिना ज्योतिष्टोमं प्रकृतमनूद्य वाजपेयद्रव्यविधानाद् गुणविधिरिति चेन्फलपदानर्थक्यापातः । अथ फलोद्देशेनापूर्वं कर्म विधेयं, तदुद्देशेन च द्रव्यरूपगुणविधिस्तर्हि वाक्यं भिद्येत । तत्परिजिहीर्षयैकस्यार्थिकत्वे "सोमेन यजेत" इतिवद् मत्वर्थलक्षणाप्रसङ्गः 'वाजपेयद्रव्यवता यागेन स्वाराज्यं भावयेत्' इति ।

(१) अधिकरणमालादिषु 'वाजो ऽन्नं तच्च पेयं सुराद्रव्यमिति यावत्' इति व्युत्पत्तिः प्रदर्शिता । मूलोक्ता तु तन्त्रवार्तिके—

"वाजपेयं यवागूः स्यादौषधद्रव्यता ततः"।इत्यनेन स्पष्टीकृतेति सुधिभिराकलनीयम् ।

इति चेन्न । तन्त्रेणाख्यातस्य फलद्रव्याभ्यां युगपत्सम्बन्धस्वीकारेण विनैव मत्वर्थलक्षणामुभयविधिसिद्धेः । आह च—

करणेपूपादिष्टेषु या ऽर्थात्साध्यत्वकल्पना ॥
तस्यां गुणविधानेन नास्ति मत्वर्थलक्षणा ॥ १ ॥

तथाहि—यजेतेत्याख्यातस्य तावद् द्वौ भागौ । एकः प्रकृतिरपरश्च प्रत्ययः । तत्र प्रत्ययांशेन तावद् भावनोच्यते । प्रकृत्यंशेन च यागः । प्रकृतेश्च निर्विभक्तिकतया प्रत्ययार्थेन साकं सम्बन्धविशेषानवबोधात्समभिव्याहारात्सम्बन्धसामान्यं प्रतीयते । तदुक्तम्—

सम्बन्धमात्रमुक्तं च श्रुत्या धात्वर्थभावयोः ॥
तदेकांशनिवेशे तु व्यापारो ऽस्या न विद्यते ॥ २ ॥ इति ।

निर्विशेषं न सामान्यमिति विशेषापेक्षेणोन्मुखं तदविशेषाद् द्रव्यफलापेक्षितं साध्यसाधनरूपं सम्बन्धद्वयमाक्षिपेत् । तथा च द्रव्येण सम्बन्धात् कर्मकारकत्वं 'वाजपेयद्रव्येण यागं भावयेत्' इति । फले सम्बन्धे च करणकारकत्वमपि 'यागेन स्वाराज्यं भावयेत्' इति । न खलु काचिदत्र कर्मत्वस्य करणत्वस्य वा प्रतिपादिका साक्षादसाधारणी विभक्तिः श्रूयते, येन उभयसम्बन्धासम्भवः स्यात् । तस्माद् गुणकर्मोभयविधिरिहत्र सिद्धान्तसूत्रे—"तुल्यत्वात् क्रिययोर्न" (अ०१.पा०४.अधि०६. सू०७) "ऐकशब्द्ये परार्थवत्"(अ०१.पा०४.अधि०६.सू०८) इति । अयमर्थः—क्रिययोः—दर्शपूर्णमासवाजपेययोः, तुल्यत्वात्—समानत्वात्,न—गुणविधिर्नेति । तथा —सकृदुच्चरिते धात्वर्थे कर्मत्वकरणत्वयोर्युगपत्सम्बन्धत्वसापेक्षया परो यवागूरूपो योऽर्थस्तद्विधानवत् तद्विधानाश्रयः तदर्थमनुवादवदिति यावत् ।

अयमभावः—यवागूरूपगुणविधाने ओषधिद्रव्यत्वेन वाजपेयस्य दर्शपूर्णमासविकृतित्वापत्तिः । न चेष्टापत्तिः "सप्त-

दशोपसत्को वाजपेयः" इति सौमिकधर्मश्रुतिविरोधात् ।

किञ्च यागस्य तन्त्रेण सम्बन्धाङ्गीकारे विरुद्धत्रिकद्वयापत्तिः । विरुद्धत्रिकं च—

उपादेयविधेयत्वगुणत्वाख्यं त्रिकं यजेः ।
उद्देश्यानूक्तिमुख्यत्वत्रिकं तस्य गुणं प्रति ॥ ३ ॥

इति माधवाचार्येणोक्तम् ।

तत्रोद्देश्यत्वमिच्छाविषयत्वम् । उपादेयत्वञ्च अनुष्ठीयमानत्वम् । ततश्चैतौ मनःशरीरोपाधिकौ धर्मौ । विधेयत्वं नाम विधित्विषयत्वम् । विधिश्च अज्ञातबोधनम् । ज्ञातस्य कथनन्त्वनुवाद इति । विधेयत्वानुवाद्यत्वधर्मौ च शब्दोपाधिकौ । मुख्यत्वं तावत् प्रधानत्वम् । गुणत्वञ्च अप्रधानत्वम् । न चैतस्य त्रिकद्वयस्यैकत्रावस्थानं सम्भवति, मिथो विरोधात् ।

यागफलयोस्तावत्स्वभावपर्यालोचनायां फलमुद्दिश्य यागस्योपादेयत्वात्, फलानुवादेन तत्साधनतया यागस्य विधानात्, फलेच्छाधीनेच्छाविषयत्वाच्च, यागस्योपादेयत्वादित्रिकं, फलस्य च उद्देश्यत्वादित्रिकं पर्यवस्यति ।

तथा यागवाजपेयद्रव्ययोः स्वभावपर्यालोचने यागमुद्दिश्य द्रव्यस्योपादेयत्वाद्,यागानुवादेन तस्य विधानात्, तदधीनेच्छाविषयत्वाच्च यागस्योद्देश्यत्वादि, द्रव्यस्य उपादेयत्वादि, त्रिकं पर्यवस्यति । न च द्रव्यं प्रति यागोऽहं उपादातुम् । तस्य तत्संस्कारकत्वप्रसङ्गात्, तृतीयाश्रुतिबाधाच्च । नापि संस्कृतस्य यवागूद्रव्यस्यान्यत्रोपयोगोऽस्ति येनैवमाश्रीयेत । तस्माद्वाजपेयपदस्याग्निहोत्रशब्दवद्यागसामानाधिकरण्येन च कर्मनामधेयमेति स्वतन्त्रकर्ममात्रविधिरिति ।

२ अथारुणाधिकरणम् ।

ज्योतिष्टोमे श्रूयते "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति" इति । तत्रारुणाशब्दो गुणविषयतया प्रयुज्यमानोऽपि अरुणं गुणमाचष्टे । "नागृहीतविशेषणा विशिष्टबुद्धिः" इति न्यायादन्वयव्यतिरेकाभ्यां तत्रैव व्युत्पत्तेश्च । तस्य च तृतीयाश्रुत्या क्रयसाधनत्वं प्रतीयते । तच्चानुपपन्नम् । अमूर्तस्य तस्य वासोहिरण्यादिवत्क्रयसाधनत्वासम्भवात् । उक्तं च—

अमूर्तत्वाद् गुणो नैव क्रियां साधयितुं क्षमः ॥
तस्मात्क्रीणातिना नास्य सम्भवत्येकवाक्यता ॥ १ ॥ इति ।

अतश्च तृतीयाश्रुतेरविनियोजकतया तया ज्योतिष्टोमप्रकरणगतग्रहचमसादीन् करणतयोपदिष्टाननूद्यारुण्यरूपो गुणो विधीयते ।

यदि च विभक्तेः निष्कृष्य कारकशक्त्यभिधायकत्वेन क्रियाविशेषकत्वात्कथं कृदन्तकरणादिशब्दवत्तृतीयया द्रव्याभिधानमिति उच्यते, तर्हि गुणवाचकपातिपदिकस्योपादानलक्षणया द्रव्यवाचित्वेन तृतीयया तद्गतकरणत्वाभिधानेन प्राप्ताप्राप्तविवेकेन विधिशक्तेर्गुणे उपसंक्रमात् प्रकरणगतविशेष्यभूतद्रव्यानुवादेन विशेषणभूतो गुणस्तत्परिच्छेदकत्वेन विधीयते । तथा च अरुणयेति भिन्नं वाक्यं, पिङ्गाक्ष्येति च । तत्राऽऽद्यस्य येन द्रव्येण किञ्चित् क्रियते तेनाऽरुणगुणकेन इत्यर्थः । नचैवं पिङ्गाक्ष्येकहायन्योरपि ज्योतिष्टोमगतसकलसाधनद्रव्यगामित्वं शङ्कनीयम् । तयोर्द्रव्यवाचित्वेन द्रव्यान्तरगामित्वासम्भवात् ।

नच पिङ्गे अक्षिणी यस्या इति षष्ठ्यर्थे समासविधानात्सम्बन्धवाचित्वं शङ्क्यम् । लाघवानुरोधेन सर्वैरपि यौगिकैः

शब्दैर्द्रव्याभिधानात् ॥

तथाहि—तेषां सम्बन्धवाचित्वे सम्बन्धमात्रमभिधेयं कल्प्यते, सम्बन्धविशेषो वा ? । नाद्यः, तेषां सर्वेषां सम्बन्धमात्रवाचितयैकार्थकत्वापातात् । अथ सम्बन्धविशेषः । ततस्तज्ज्ञानस्य सम्बन्ध्यधीनत्वादनुक्तसम्बन्धिनश्च तद्यवच्छेदासामर्थ्यमिति, तस्य चोभयनिष्ठत्वादुभौ सम्बन्धिनाववश्यमभिधातव्यौ । तत्रैकस्य वृत्तिघटकपदेनाभिधानाद् द्वितीयनिरूपिता वृत्तौ शक्तिः कल्प्यते इत्यवश्यमभ्युपेतव्यमिति । ततश्च सम्बन्धिनमभिधाय सम्बन्धाभिधानेऽतिगौरवमिति । एवं च पिङ्गाक्ष्येकहायनीशब्दयोरपि पिङ्गे अक्षिणी यस्याः, एकं हायनं यस्या इति यौगिकत्वेन सिद्धं द्रव्यवाचित्वम् । उक्तं च—

सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते ।
न हि सम्बन्धवाचित्वं सम्भवत्यतिगौरवात् ॥ २ ॥
सम्बन्धिनैव सम्बन्धः प्रत्येतुं यदि शक्यते ।
पुनस्तस्याभिधाशक्तिं कः श्रुतेः परिकल्पयेत् ॥ ३ ॥

एवं च वाक्यभेदेन प्रकरणात् ज्योतिष्टोमगतकरणभूतसकलद्रव्यगामी आरुण्यगुणः ।

यत्तु समानवाक्यश्रुतपिङ्गाक्षीद्रव्यानुवादेनाऽऽरुण्यगुणो विधीयताम् । वाक्यभेदश्च नेति । तन्न, "ऐकशब्द्ये परार्थवत्" इतिन्यायेन पिङ्गाक्ष्याः क्रयारुणौ प्रति वैरूप्यप्रसङ्गादिति पूर्वपक्षे सिद्धान्तसूत्रम्—"अर्थैकत्वं द्रव्यगुणयोरेककर्म्यानियमः स्यात्" इति (अ० ३—पा० १—अधि० ६—सू० १२) अयमर्थः—द्रव्यगुणयोरेकक्रियान्वयित्वरूपार्थैकत्वे सम्भवति तयोः परिच्छेद्यपरिच्छेदकभावनियमः । ऐककर्म्याद् एकार्थमिति-

पादकत्वरूपैकवाक्यत्वात् । अयमभावः-उदाहृतवाक्येन भावार्थाधिकरणन्यायेन (अ० २-पा० १ अधि० १ सू० १ द्वितीयवर्णकम्) क्रयो विधीयते । तस्मिंश्च तृतीयाश्रुत्या पिङ्गाक्ष्यादेर्यथा करणत्वं, तथा आरुण्यगुणस्यापि । तच्च स्वसाध्यक्रियापेक्षितया पिङ्गाक्ष्यादिद्रव्यमनपेक्ष्यैव वाक्येन साक्षात्क्रये ऽन्वेति । खल्लेकपोतन्यायेन सर्वकाङ्क्षाणां साक्षात्क्रियान्वयनियमात् । उक्तं च—

कारकं श्रुत्यते कुर्वन्नाक्रियां तत्करोति च ॥
तस्मान्न द्रव्यसम्बन्धः कारकस्यास्ति कस्य चित् ॥४॥ इति ।

यदि तस्यामूर्तत्वात्साक्षात्क्रियासाधनत्वं न सम्भवति इति विभाव्यते, तर्हि क्रयसाधनद्रव्यपरिच्छेदमुखेनान्वीयताम् । तदुक्तम्—

तृतीयया गुणस्यैव करणत्वं क्रयं प्रति ॥
विस्पष्टं गम्यते तच्च द्रव्यद्वारेण युज्यते ॥ ५ ॥

किञ्च—

द्रव्येण साधनीयेयमिति ज्ञाता यदा क्रिया ।
कीदृशेनेत्यपेक्षा ऽस्य गुणे ऽप्युत्पद्यते तदा ॥ ६ ॥

द्रव्यमप्यपरिच्छिन्नं न क्रियां साधयितुमलमिति परिच्छेदकमपेक्षते । गुणश्च क्रियासाधनत्वेनोच्यमानः तां च स्वतः साधयितुमक्षमः तदर्थं परिच्छेद्यं द्रव्यमपेक्षते इति द्रव्यगुणयोः परस्परमपेक्षितत्वात्मुनिरूपितः पार्ष्णिकः परिच्छेद्यपरिच्छेदकभावेनान्वयः । युक्तं च गुणस्य तत्परिच्छेदकत्वात्क्रियासाधनत्वाभिधानम् । एवञ्च साधनत्वेन गुणं विदधती श्रुतिः यथैतेन शक्यते क्रियां साधयितुं तथा कुर्यादित्याह । स च द्रव्यपरिच्छेदेनैव शक्नोति साधयितुं, नान्यथा ।

तथा च अरुणपरिच्छिन्नेन पिङ्गाक्षीद्रव्येण क्रयं कुर्यादित्यर्थस्य पर्यवसानेन वाक्यभेदाभावेन च न चमसादिषु गुणो निविशते ।

किञ्च प्रकरणेन चमसादिषु गुणनिवेशं वदता वक्तव्यमिदं केन तत्र गुणो विधीयते । नच श्रूयमाणविधिना तत्सम्भवति । क्रीणातिना त्वया सम्बन्धस्य नेष्यमाणत्वात् । नाप्यरुणपदस्य विधिशक्तिरस्ति । प्रयोगवचनं त्वक्रियात्मकं दूरादुपेक्षते । मम तु क्रीणातिना सम्बन्धस्येष्टत्वात्सुलभं विधानम् । न चैवं वासोहिरण्यादिषु क्रयसाधनत्वाविशेषः स्यादिति वाच्यम् । तेषां क्रयान्तरसाधनत्वात् । नहि स्ववाक्यगतं पिङ्गाक्षीद्रव्यमुपेक्ष्य वाक्यान्तरोपात्तवस्त्वाद्यवच्छेदो युक्तः । तस्मादारुण्यगुणः क्रयहेतुं पिङ्गाक्षीमेव भजते इति ।

३ अथ वैश्वानरेष्ट्यधिकरणम्–

काम्येष्टिकाण्डे श्रूयते "वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते, यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति, यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति, यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति, यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति, यद्द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति, यस्मिन् जाते एतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति" इति । तत्राष्टाकपालादिशब्दाः प्रकृतवैश्वानरयागस्य नामधेयपरा गुणविधिपरा अर्थवादपरा वा ? । तत्राष्टाकपालादिशब्दबोधिताष्टत्वादिसंख्यानां द्वादशस्वन्तर्भावेन प्राप्तत्वात्तत्प्रख्यन्यायेन "वैश्वदेवेन यजेत" इतिवद् "अग्निहोत्रं जुहोति" इतिवद्वा तेषां यागनामधेयत्वं युक्तम् ।

तत्र हि "वैश्वदेवीमामिक्षाम्" इत्यनेन यागे विश्वदेवसम्बन्धस्य

प्राप्तया "वैश्वदेवेन यजेत" इत्यत्र वैश्वदेवशब्देन विश्वदेवदेवतविधानासम्भवात्तस्य नामधेयविधित्वम्। "अग्निहोत्रं जुहोति" इत्यत्रापि "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा" इति मन्त्रवर्णेनाग्नेः प्राप्तत्वेन तद्विधानासम्भवादग्निहोत्रमिति कर्मनामधेयम्।

अथ नात्र द्वादशकपालादिशब्दाः संख्यापराः, किन्तु द्वादशसु कपालेषु संस्कृतः पुरोडाश इति प्रयोगेन द्रव्यपराः। एवञ्च द्रव्ये द्रव्यान्तरानन्तर्भाव इत्यप्राप्तत्वम्। द्वादशकपाल एवाष्टसु संस्कृत इति तु वक्तुमशक्यम्। अन्यथा ऽष्टानामन्यैश्चतुर्भिः कपालैः साकाङ्क्षाया सामर्थ्याभावात्समर्थाधिकारे "संस्कृतं भक्षाः" (अ० ४ पा० २ सू० १६) इति पाणिनिसूत्रविधीयमानतद्धितानुत्पत्तिप्रसङ्गः। एवं च न नामत्वम्। अप्राप्तत्वादेव च नार्थवादत्वम्। न ह्यविहितस्याष्टाकपालस्य स्तुतिः सम्भवति। तदुक्तम्—

"सामानाधिकरण्ये हि नामधेयं प्रगीयते"। इति।
"पूर्वज्ञातार्थवाचित्वे नामधेयार्थवादते"॥ इति च।

तस्मात्प्रकृतवैश्वानरयागे ऽष्टाकपालपुरोडाशरूपगुणविधिरिति।

न चैवमुत्पत्तिशिष्टद्वादशकपालावरुद्धत्वात् तत्रान्यद्रव्यनिवेशासम्भवात्तद्व्यैयर्थ्यमिति वाच्यम्। उपक्रमोपसंहारवशात्सर्वं चेदमेकं वाक्यमिति पर्यालोचनेन वैकल्पिकाष्टाकपालादिद्रव्यविशिष्टवैश्वानरेष्टिविधानात्सर्वेषामुत्पत्तिशिष्टत्वसाम्येन पक्षे चारितार्थ्यात्। तस्माद् गुणविधिरिति पूर्वपक्षे सिद्धान्तसूत्रम्—अविभागाद्विधानार्थं स्तुत्यर्थेनोपपद्येरन् (अ० १-पा० ४-अधि० ११ सू० २०) इति। अयमर्थः—विधानार्थे—कपालगतद्वादशसंख्यायामष्टत्वादिसंख्याया अविभागात्—नियमात्,

तस्या अवयवरूपत्वादिति यावत् । द्वादशकपालस्तुत्यर्थत्वेनाष्टाकपालादिशब्दा उपपद्येरन् । अवयवस्तुतिद्वारा अवयविस्तुतिरित्यर्थः । तथा हि—

अष्टत्वाद्यविधानत्वाच्चार्थेयं तत्प्ररोचना ।
तस्माद्वयवद्वारं द्वादशत्वं प्ररोच्यते ॥

अयम्भावः—सर्वत्र तावद्वरस्य स्तुतिर्दृश्यते । वरं चात्र द्वादशकपालसंस्कृतपुरोडाशद्रव्यं विधेयत्वात् । तस्माच्चस्य यथा स्तुतिर्भवितुमर्हति तथा कर्तव्या । अष्टाकपालादिशब्दाश्च तत्प्रतीत्यजनका अपि तदेकदेशं प्रत्याययितुमर्हन्तीति तदेकदेशप्रत्यायनद्वारा एकदेशिनो द्वादशकपालस्य तैः शब्दैः स्तुतिः प्रतीयते । तथा च श्रुतेरयमर्थः—ईदृशोऽयं द्वादशकपालः पुरोडाशो महाभागः, यस्मिन् क्रियमाणे अष्टाकपालादयोऽपि सम्भाविता भवन्ति, ते च ब्रह्मवर्चसादिसिद्धिभिः प्रशस्ताः, तस्मात्प्रशस्तोऽयमिति । यागविधायकवाक्येन द्वादशकपालस्य विहिततया न स्तुत्यस्याज्ञातत्वं, येनाष्टादिशब्दानां स्तावकत्वं नोपपद्येत ।

किञ्च तस्य "जगत्यैवास्मिन्" इति पृथक्स्तुतिसत्त्वेऽप्यधिकप्राशस्त्यबोधनार्थमधिकस्तुत्यपेक्षया नानर्थक्यम् ।

विधिपक्षे तु वैश्वानरस्य द्वादशकपालावरुद्धत्वात् पश्चाच्छ्रूयमाणाष्टाकपालादीनां वैयर्थ्यं स्पष्टमेव ।

ननूक्तं सर्वेषामुत्पत्तिशिष्टत्वेन समानबलत्वाद्व्रीहियवद्विकल्पेन चारितार्थ्यमिति । तत्रोक्तम्—

उत्पत्तिवाक्यशिष्टत्वं न तावदुपपद्यते ।
सर्वेषामर्थभेदेन वाक्यं तत्र हि भिद्यते ॥

वैकल्पिका अष्टाकपालादिगुणा वैश्वानरे विधीयन्ते इति वि-

भाव्यते चेन्नानागुणविधानेनार्थभेदाद्वाक्यभेदप्रसङ्गः । उपक्रमोपसंहारदर्शनेन च वाक्यैकत्वं प्रतीयते । तस्मान्नाष्टाकपालादीनां समानबलत्वमिति ।

ननु मास्तूत्पत्तिशिष्टत्वं परमष्टाकपालादिगुणविधिगतद्वादशकपालाद्यन्यथाऽनुपपत्त्या वैश्वानरवाक्यगतद्वादशकपालस्य सामान्यतो द्रव्योपलक्षकत्वविवक्षणात्पूर्वेषामेवैभिर्विधानादुत्पन्नशिष्टत्वात्तुल्यबलत्वमिति । उच्यते, अष्टाकपालादीनां स्तावकत्वेनोपपत्तौ विधिवाक्यगतवैश्वानरसमानाधिकरणद्वादशकपालशब्दस्योपलक्षणत्वविवक्षाया निष्प्रमाणत्वात् ।

किञ्च निर्वपतिनाऽत्र यागो विधीयते । स च द्वितीयान्तेन द्वादशकपालेनैव सम्बध्यते, न तु प्रथमान्ताष्टाकपालादिभिः, निराकाङ्क्षत्वात् । आख्यातार्थनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबोधे प्रातिपदिकाद्विहितकारकविभक्तिजन्योपस्थितेः कारणत्वादाख्यातस्य कारकविभक्त्यन्तेन साकाङ्क्षत्वात् । नचाष्टाकपालादिवाक्यैः स्वतन्त्रं कर्म विधीयते । द्रव्यदेवतारूपयागस्वरूपानुपलम्भेः ।

ननु वैश्वानरपदस्य अनुषङ्गाधिकरणन्यायेन (अ० २-पा० १ सू० १६) सम्बन्धे देवतालाभेन यागस्वरूपासिद्धिरिति चेन्न । भिन्नविभक्तिकत्वेन द्वितीयान्तवैश्वानरपदस्य प्रथमान्ताष्टाकपालादिशब्दैरनुषङ्गासम्भवात् । तदुक्तम्—

वैश्वानरपदं नापि यागायात्रानुषज्यते ।
विभक्त्यन्तरयोगित्वात्, न चेतेऽस्मादनर्थकम् ॥ इति ।

न च विभक्तिविपरिणामेन तत्सम्भव इति वाच्यम् । अष्टाकपालादिश्रुतेः स्तावकत्वेनोपपत्त्या ऽनुषङ्गविभक्तिविपरिणामयोरयुक्तत्वात् ।

नापि ब्रह्मवर्चसादिफलाय गुणविधिः । वाक्यभेदप्रसङ्गात् । तस्मात् पूर्वोक्तप्रकारेण नामधेयविधित्वयोरभावेन 'पुत्रे जाते' इत्यत्रोपक्रान्तस्य द्वादशकपालस्य 'यस्मिन् जाते' इत्यनेनोपसंहारादेकवाक्यत्वपर्यालोचनया स्तुत्या विना च तदसम्भवात्स्तावकत्वमेव युक्तम् । तथा च अष्टाकपालादिभिरंशैरंशिनो द्वादशकपालस्य स्तुतिरिति ॥

४ अथासञ्जातविरोधिन्यायः ।

"प्रजापतिरकामयत प्रजाः सृजेयेति । स तपोऽतप्यत । तस्मात्तेपानात्* त्रयो देवा असृज्यन्त 'अग्निर्वायुरादित्यः' । ते तपोऽतप्यन्त । तेभ्यस्तेपानेभ्य*स्त्रयो वेदा ह्यसृज्यन्त । अग्नेर्ऋग्वेदो, वायोर्यजुर्वेद, आदित्यात्सामवेदः" इत्युपक्रम्य ज्योतिष्टोमे श्रूयते "तस्मादुचैर्ऋचोपांशु यजुषा उच्चैः साम्ना" इति । अत्रोपक्रमोपसंहारयोरेकवाक्यत्वानुरोधाय तयोरेकार्थविषयत्वावश्यकतया उच्चैस्त्वादिविधिवाक्यगतऋगादिशब्दा—यत्रार्थवशेन पादव्यवस्थेत्यादिलक्षणार्थकाः पूर्वश्रुतमन्त्र—ब्राह्मणसमुदायपरवेदशब्दसामानाधिकरण्याय लक्षणया तदर्थपरत्वेन व्याख्येयाः? उतोपक्रमगतवेदशब्द एवोपसंहारस्थऋगादिशब्दसमानार्थत्वाय लक्षणया व्याख्येय इति ? । तत्रोक्तम्—

गुणत्वादनुवादत्वादर्थवादस्य लक्षणा ॥
मुख्यस्यापि प्रधानत्वादप्राप्तविषयत्वतः ॥
विध्युद्देशो जघन्योऽपि स्वार्थहानिं न गच्छति ॥ इति ।

उच्चैस्त्वादिधर्मविधाने हि ऋगादेरुद्देश्यतया विधिवाक्यगतत्वेन प्राबल्यादप्राप्तविषयत्वेन प्राधान्याच्च तदपेक्षयोपक्र-

* कानजन्तमेतत् ।

"ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदेन तिष्ठति मध्ये अन्हः ।
सामवेदेनास्तमये महीयते वेदैरशून्यैस्त्रिभिरेति सूर्यः" ॥

इति मन्त्रे प्रथमचरणे ऋक्शब्दस्य मन्त्रब्राह्मणसमुदाये प्रयोगदर्शनात् । नहि तत्र स मन्त्रमात्राभिधानाभिप्रायेण प्रयुक्त इति भ्रमितव्यम् । चतुर्थचरणे वेदैरिति बहुवचनानुपपत्तेः ।

यश्च संशय उच्चैस्त्वानुष्ठाने उक्तः सोऽपि न । नहि पाठमात्रेण तद्गतधर्मानुष्ठानप्रसक्तिः । किन्तु येषां यत्र विधानं तेषां तद्गतधर्मो भवति । यदि केषां चिदुभयत्रापि विधानं तर्हि "भूयस्त्वेनोभयश्रुति" (अ० ३–पा० ३ अधि० ३ सू० १०) इति न्यायेन निर्णयः । यत्र तु भूयस्त्वमपि नास्ति तत्रेष्ट एव विकल्प इति ।

शिवं भूयात् ।

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) १

(१६) मीमांसाबालप्रकाशः जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि-मीमांसादर्शनम् । महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्राशङ्करभट्टकृतौ मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः । (वेदान्तः) ३

(१९) कात्यायनप्रोतसूत्रम् । महामहोपाध्याय श्रीकर्काचार्यविरचितभाष्यसहितम् । १३

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितं संपूर्णम् (वेदान्तः) ३

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनकङ्किकाविभजनाख्यया व्याख्यया विद्यासागरीति प्रसिद्धया समेतम् । (वेदान्तः) १४

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता १

(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्याऽवतरणिकया च सहितम् । ८

(२४) ब्रह्मसूत्रवृत्तेः मरीचिका श्रीवज्रनाथभट्टकृता (वेदान्तः) २

(२५) क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि २

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २

(२७) षड्दर्शनसमुच्चयः । बौद्धनैयायिकसांख्यजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः । १

(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः प्रमेयरत्नार्णवश्च १

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्याः जागदीशी टीका । १३

(३०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा—संस्कारप्रकाशात्मकः । सापिण्ड्यदीपकश्च ... ११

(३१) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः १

(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः । ४

(३३) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । १

(३४) प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः २

(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १

(३६) योगदर्शनम् । परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित-योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम् । १

(३७) वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृतब्रह्माऽमृतवर्षिणीसमाख्यव्याख्यासंवलितम् । ४

(३८) विश्वप्रकाशः । कोशः । विद्वद्वरश्रीमहेश्वरसूरिविरचितः । २

(३९) श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचितटिप्पणीसहिता । श्रीमद्भागवतदशमस्कन्धजन्मप्रकर्ण श्रीसुबोधिनीटिप्पण्योः—प्रकाशः गोस्वामि श्रीश्री पुरुषोत्तमजीमहाराज विरचित १

(४०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः । ... ४

(४१) वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः । वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद. शर्मकृता अध्यात्मसुधातरङ्गिण्याख्य टीकया सहिता । ३

(४२) स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमविरचितः । स्वकृतटीकाविभूषितश्च । १

(४३) याज्ञवल्क्यस्मृतेः । बालम्भट्टीसमाख्यव्याख्यासमलङ्कृतमिताक्षरासहिता । व्यवहाराध्यायः ११

(४४) गादाधरी । श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता । श्रीमद्गङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता । ४

(४५) शास्त्रदीपिका । श्रीपार्थसारथिमिश्र प्रणीता । रामकृष्णविरचितयुक्तिस्नेहप्रपूरण्याख्यव्याख्यया सहिता तर्कपाद । ५

(४६) वैयाकरणसिद्धान्तलघुमञ्जूषा महामहोपाध्याय-श्रीनागेशभट्टविरचिता । श्रीमद्दुर्बलाचार्य बालम्भट्टाभ्यां विरचितकुञ्चिकाकलाह्वटीकाद्वयसंवलिता । ८

(४७) व्याकरणसिद्धान्तसुधानिधीः । पर्वतीय विश्वेश्वरसूरिविरचितः । ६

(४८) विरमित्रोदयः । लक्षणप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ६

(४९) बृहदारण्यकवार्त्तिकसार श्रीमद्विद्यारण्यस्वामिविरचितः । महेश्वरतीर्थकृतयालघुसंग्रहाख्यया टीकया समलंकृतः । ४

(५०) विरमित्रोदयः । राजनीतिप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ४

(५१) पूर्वमीमांसा अधिकरणकौमुदी । श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्यविरचिता परिशिष्टाधिकरणनिरूपणपूर्वकं टिप्पण्या परिष्कृत । १

परत्रादिप्रेषणस्थानम्

हरिदासगुप्तः,
चौखम्बा बनारस सिटी

128 (4)

15/49 J